त्रिबीजेशाय । त्र्यम्बकाय । तुम्बवीणाय । तुम्बवीणाशालिने । तुम्बीफलप्राणाय । तुम्बुरुस्तुताय । तुभ्यं नमः । २६००

तमसे नमः । तमोगुणाय । तमोपहाय । तमसः पराय । तमोमयाय । तमिस्रघ्ने । तमिस्रमथनाय । तमिस्रानायकाय । तमीनचूडाय । तमालकुसुमाकृतये । तामसात्मने । तामसप्रियाय । ताम्रजिह्वाय । ताम्रचक्षुषे । ताम्रवक्त्राय । ताम्राधराय । ताम्राय । ताम्रोष्ठाय । ताम्रचूडाय । ताम्रवर्णबिलप्रियाय नमः । २६२०

ताम्रपर्णी जलप्रियाय नमः । ताम्रनेत्र विभूषिताय । ताम्रपर्णी समुद्रसंगमे सेतुबन्ध रामेश्वराय । त्रिमूर्तये । त्रिमधुराय । त्रिमल्लेशाय । त्रिमेखलाय । तुमुलाय । तोमराय । तंयज्ञोपवीताय । त्रयीमूर्तये । त्रयीतनवे । त्रयीमयाय । त्रयीवेद्याय । त्रयीवन्द्याय । त्रय्यन्त निलयाय । तोयात्मने । तरुणाय । तरलाय । तरस्विने नमः । २६४०

तरुणार्क समद्युतये नमः । तरणये । तरणिमध्यस्थाय । तरणिनयनाय । तरंगिणीवतंसाय । तारकाय । तरुणेन्दुशिखाय । तरुणेन्दुशेखराय । तरुणादित्यसंकाशाय । तारकारिजनकाय । तारलोचनाय । तारकासुरविध्वंसिने । तारकान्ताय । तारानायकभूषाय । ताराय । ताराधिनाथाय । तारणाय । तारदन्त मध्यगाय । तारतम्यज्ञाय । तारानाथाय नमः । २६६०

तारदराय नमः । ताराधिपनिभाननाय । तारानाथ-समद्युतये । तारानाथकलामौलये । तारापतिनिषेविताय । तार्क्ष्याय । तार्क्ष्यविनुताय । तीर्थाय । तीर्थ्याय । तीर्थिने । तीर्थभूमिरताय । तीर्थश्राद्धफलप्रदाय । तीर्थदानपरायणाय । तीर्थप्रीतये । तीर्थरताय । तीर्थदेवाय । तीर्थपादाय । तीर्थतत्वाय । तीर्थदेवशिवालयाय । तुरंगवाहनारूढाय नमः । २६८०

तुरीयचैतन्याय नमः । तुर्याय । तोरणाय । तोरणेशाय । त्रिराशिकाय । त्रैराशिकफलप्रदाय । तर्क्यातर्क्यशरीराय । तलादिभुवनान्तस्थाय । तलाय । तल्प्याय । तालाय । तालुरन्ध्रस्थिताय । तालीप्रियाय । तालधराय । ताल्याय । तिलाक्षतप्रियाय । तिलान्नप्रीतमानसाय । तिलपर्वतरूपधृते । तिलपिष्टान्नभोजिने । तिलमनसे नमः । २७००

त्रिलोकवासिने नमः । त्रिलोकरक्षकाय । त्रिलोचनाय । त्रिलोकेशाय । त्रिलिङ्गरहिताय । त्रिलोकात्मने । त्रिलोकमुद्रिका-भूषाय । त्रैलोक्यसुन्दराय । त्रैलोक्यमोहनाय । त्रैलोक्यनाथाय । त्रैलोक्यपालिने । त्रैलोक्यवासिने । तुलसीबिल्वनिर्गुण्डीजंबीरा-मलकप्रियाय । तुलामाघस्नानतुष्टाय । तुलादानफलप्रदाय । तुलजापुरनायकाय । तुलापुरुषरूपधृते । तूलाय । तूलबुध्नाय । तैलमोदकतोषणाय नमः । २७२०

तैलप्रीताय नमः । तैलभोजनतत्पराय । तैलदीपप्रियाय । तैलपक्वान्नप्रीतमानसाय । तैलाभिषेकसन्तुष्टाय । तैलचर्वण-तत्पराय । तैलाहारप्रियप्राणाय । त्रिविष्टपेश्वराय । त्रिधागतये । त्रिविद्याय । त्रिवराय । त्रिविष्टपाय । त्रिविक्रमाय । त्रिविलोचनाय । त्रिविक्रमार्चिताय । त्रिविक्रमेश्वराय । त्रिवर्गयज्ञदाय । त्रिवर्गदाय । त्रिवर्गाय । तीव्राय नमः । २७४०

तीव्रवेदशब्दधृते नमः । तीव्रयष्टिकराय । त्रिशक्तियुताय । त्रिशिरसे । त्रिशूलाय । त्रिशुक्लसम्पन्नाय । त्रिशंकवे । त्रिशंकुवरदाय । त्रिशूलपाणये । त्रिशूलिने । त्रिशूलचर्मधारिणे । त्रिशूलपट्टसधराय । त्रिशूलधारिणे । त्रिशूलभीषणाय । त्रित्रिशब्दपरायणाय । त्वष्ट्रे । तिष्याय । तुष्टाय । तुष्टभक्तेष्टदायकाय । तुष्टिप्रदाय नमः । २७६०

तुषाराचलमध्यस्थाय नमः । तुषारवनभूषणाय । तुषमयाय । तुष्टातुष्टप्रसादकाय । तुषाराद्रिसुताप्रियाय । तोषिताखिलदेवौघाय । तस्मै । तस्मादपि वराय । तस्कराध्यक्षाय । तस्करशिक्षकाय । त्रिस्थाय । त्रिस्वरूपाय । त्रिसन्ध्याय । त्रिसुगन्धाय । त्रिहस्तकाय । तुहिनाद्रिचराय । तुहिनाचलसंकाशाय । तालिने । तक्षकक्रीडनाय । तक्षकाय नमः । २७८०

तक्षाय । तक्षिणे । त्र्यक्षाय । त्र्यक्षकाय । त्र्यक्षराय । तीक्ष्णवरप्रदाय । तीक्ष्णपरशवे । तीक्ष्णाय । तीक्ष्णतापाय । तीक्ष्णकृपाणाय । तीक्ष्णरश्मये । तीक्ष्णेषवे नमः । २७९२

थकारस्य धर्मराजो देवता । विषनाशे विनियोगः ।

थकारकूटनिलयाय नमः । थाकाराय । थसुखप्रदाय । थशेखराय । थिमिन्थिमिने । थिमिरूपाय । थैंनाट्यनायकाय । थंदक्षिणबाहुभूषणाय नमः । २८००

दकारस्य महालक्ष्मीर्देवता । विषनाशने विनियोगः ।

दकाराय नमः । दिक्पतये । दुःखहन्त्रे । दुःखदोषविवर्जिताय । दिगंबराय । दिग्वाससे । दिग्वस्त्राय । दुग्धान्नप्रीतमानसाय । दुग्धाभिषेचनप्रीताय । दृग्रूपाय । दोग्ध्रे । द्विजोत्तमाय । दण्डाय । दण्डिने । दण्डहस्ताय । दण्डरूपाय । दण्डनीतये । दण्डकारण्यनिलयाय । दण्डप्रसादकाय । दण्डनाथप्रपूजिताय नमः । २८२०

दाडिमीपुष्पाभाय नमः । दाडिमीपुष्पभूषिताय । दाडिमीबीजरदनाय । दाडिमीकुसुमप्रियाय । दृढाय । दृढप्रज्ञाय । दृढायुधाय । दृढधन्विने । दृढवैद्यरताय । दृढचारिणे । द्रोणपुष्पप्रियाय । द्रोणाय । द्रोणपुष्पार्चनप्रियाय । दात्रे ।

दान्ताय। द्वात्रिंशत्तत्वरूपाय। दुत्तूरकुसुमप्रियाय। द्युतिमते। द्युतिधराय। दूताय नमः। २८४०

देदीप्यमानाय नमः। दैत्यघ्ने। दैत्यदानवरक्षसां पतये। दैत्यानामन्तकेशाय। दैत्याक्रन्दकराय। दैत्यानामन्तकाय। दैत्यदर्पनिषूदनाय। द्योताय। द्वन्द्वातीताय। द्वादशाख्नासनाय। द्वादशात्मस्वरूपिणे। दुन्दुभाय। दुन्दुभ्याय। दुन्दुभये। दुन्दुभेर्मर्दनाय। दनुजारये। दानवारये। दानवनाशनाय। दानरूपाय। दानसन्तानतोषिताय नमः। २८६०

दानवान्तकाय नमः। दानाध्यक्षाय। दिननाथाय। दिनकरकोटिप्रभाकरलिङ्गाय। दीनाय। दीननाथाय। दीनार्तिहृते। दीनवल्लभाय। दीनसाधकाय। दीनोरुदायकाय। दीनदैन्यविमोचनाय। दैन्यहन्त्रे। दर्पघ्ने। दर्पिताय। द्वीपानां प्रभवे। दीप्ताय। दीप्तये। दीप्तिमते। दीप्तमूर्तये। दीप्तागमोरवे नमः। २८८०

दृप्ताय नमः। दंभाय। दंभरहिताय। दंभदाय। दंभनाशकाय। दंभविवर्जिताय। दमाय। दमनाय। दमयित्रे। दमात्मकाय। दामोदरप्रियाय। द्युमणये। दयालवे। दयाकराय। दयासिन्धवे। दयासुधानयनाय। दयासुधाम्बुधये। दयानिधये। दयावते। दयापराय नमः। २९००

दयावराय नमः। दर्पणाय। दर्परूपाय। दर्पनाशकाय। दरीसंस्थाय। दरदम्बुजलोचनाय। दरस्मेरमुखाम्बुजाय। दरांदोलितदीर्घाक्षाय। दारुकावनवासेश्वराय। दारुकावनमौनि-स्त्रीमोहनाय। दारुकारण्यनिलयाय। दारिद्र्यशमनाय। दारिद्र्यदुःखदहनाय। दारिद्र्यवडवानलाय। दारिद्र्यध्वंसकाय। दीर्घतपसे। दीर्घाय। दीर्घशृंगैकशृङ्गाय। दीर्घसूत्राय। दीर्घिकाजलमध्यगाय नमः। २९२०

दीर्घदर्शिने नमः । दुर्वाससे । दुरावासाय । दुरासदाय । दुर्गमाय । दुर्गाय । दुर्लभाय । दुर्ज्ञेयाय । दुराधाराय । दुर्भवाय । दुर्धर्षाय । दुर्जयाय । दुरतिक्रमाय । दुर्लंघ्याय । दुर्दमाय । दुर्दान्ताय । दुराराध्याय । दुरत्ययाय । दुर्धराय । दुराधर्षाय नमः । २९४०

दुरारोहाय नमः । दुरुत्तराय । दुरितापहारकाय । दुरितमत्तमतंगजपंचाननाय । दुर्गेशाय । दुर्गभवसागरतारणाय । दुर्गवरदायकाय । दुरितघ्ने । दुर्मतिनाशनाय । दुरितापहाय । दुर्वारभुजविक्रमाय । दुरार्तिघ्ने । दुर्वारविक्रमाय । दुराचार-प्रशमनाय । दूरश्रवसे । दूरेवधाय । दूर्वासमुनिपूजिताय । दूर्वायुग्मसमाराध्याय । द्रवते । द्रविणाय नमः । २९६०

द्रव्याणां प्रभवे नमः । द्रव्याय । द्रव्यस्वरूपधृते । दंवामबाहुभूषणाय । दिवस्पतये । दिव्याय । दिवाकराय । दिव्यनृत्ताय । दिवोदासेश्वराय । दिव्यभोगाय । दिव्यानन्दाय । दिवि सुपर्वणाय । दिव्यन्तरिक्षगमनाय । दिव्यमाल्याम्बर-विभूषिताय । दिव्यायुधधराय । दिव्यास्त्रविदे । दिव्यलोचनाय । दिव्यदेहप्रभाकूटसंदीपितदिगंतराय । दिव्यमालासमन्विताय । दिव्यलेपविराजिताय नमः । २९८०

दिव्यचन्दनचर्चिताय नमः । दिव्यादिसेव्याय । दिव्यचक्षुषे । दिव्यतरुवाटीकुसुमवृन्द निष्यन्दमानमकरन्दबिन्दुसन्दोह संक्लिद्यमान सकलांगाय । दिव्यशायिने । दिव्यनृत्तप्रवृत्ताय । दिव्यसहस्रबाहवे । दिव्याक्रंदकराय । देवाय । देवराजसेव्यमान पावनांघ्रिपंकजाय । देवदेवाय । देवेन्द्राय । देवयोग्याय । देवभोग्याय । देवभोगदाय । देवर्षिमण्डिताय । देवर्षिवर्ज्याय । देवतार्तिप्रशमनाय । देवेड्याय । देवताप्राणवल्लभाय नमः । ३०००

देवगङ्गाजटाजूटाय नमः । देवेन्द्ररक्षकाय । देवान्तकवर-प्रदाय । देवासुराराध्याय । देवासुरवरप्रदाय । देवासुरतपस्तुष्टाय । देवासुरगणाग्रण्यै । देवासुरगणाध्यक्षाय । देवासुरेश्वराय । देवासुरगुरवे । देवासुरनमस्कृताय । देवासुरमहामात्राय । देवासुरमहाश्रयाय । देवासुरमहेश्वराय । देवर्षिदेवासुरवरप्रदाय । देवादिदेवाय । देवात्मने । देवनाथाय । देवप्रियाय । देवज्ञाय नमः । ३०२०

देवचिन्तकाय नमः । देवानां शतक्रतवे । देव्यादिप्रीतिकराय । देवदानवदैत्यानां गुरवे । देवगर्भाय । देवगणार्चितसेवितलिङ्गाय । देवसिंहाय । देवमुनिप्रवरार्चित-लिङ्गाय । देवकीसुतकौन्तेयवरदाय । देवानामीश्वराय । देव्याः प्रियकराय । देवराजाय । देवाधिपतये । देवासुरपतये । देवदेवेन्द्रमयाय । देवासुरविनिर्मात्रे । देवसैन्यपतये । देवेशाय । देवासुरमहामान्याय । देवभृते नमः । ३०४०

देवमान्याय नमः । देवतानवकपंचब्रह्मात्मने । देवताप्रियाय । देवासुरगुरुस्तव्याय । देवदेवेशाय । देवभस्मकण-प्रियाय । देवशिखामणये । देवशिखान्तकाय । देवसिन्धु तरङ्गशीकरसिक्त शीतजटाधराय । देवाधिदेवेशाय । देवराजारिमर्दनाय । देवानुगतलिंगिने । देवार्चितमूर्तये । देव्याःकार्यार्थदायिने । देवतात्मने । देवर्षये । देवासुरगणाश्रयाय । देवासुरपरायणाय । दैत्यगुरवे । दैवताय नमः । ३०६०

दैवतलिङ्गिने । दैवतनाथाय । दशबाहवे । दशहस्ताय । दशकराय । दशदिक्पालपूजिताय । दिशावस्त्राय । दिशावासाय । दिशांपतये । दृश्यादृश्याय । देशानां ब्रह्मावर्ताय । देशकालपरिज्ञात्रे । देशोपद्रवनाशकाय । दंष्ट्रिणे । दंष्ट्रात्मने ।

दंष्ट्राभ्रुकुटीधरश्यामप्रौढ दक्षिण वदनाय। दुष्कृतिघ्ने। दुष्प्रेक्ष्याय। दुष्प्रधर्षाय। दुष्टानां विलयाय नमः। ३०८०

दुष्टानां पतये नमः । दुष्प्रकंपाय । दुष्टमृत्यवे । दुष्टावग्रहवारकाय। दुष्टभूतनिषूदनाय। दुष्टभयदाय। दुष्टदूराय। दुष्टहन्त्रे। दृष्टिघ्नाय। दृष्टये। दृष्टिनिलयाय। दोषाकरकलामौलये। दुःस्वप्ननिवारकाय । दुःस्वप्ननाशनाय । दुस्सहाय । दुस्सहहर्षणाय। द्रुहिणाय। द्रुहिणांभोजनयनदुर्लभाय। देहाय। देहधावल्यशुद्धसत्वात्मकत्वप्रकटनाय नमः। ३१००

दलितारिनिकराय नमः। दलदम्बुजनेत्राय। दलदिन्द्रनील-ग्रीवाय । दलदञ्जनभासाय । दलघातिने । दक्षाय । दक्षसुयज्ञविनाशनलिङ्गाय । दक्षकन्यापतये । दक्षवरप्रदाय । दक्षमखध्वंसिने। दक्षाध्वरहराय। दक्षनाशकराय। दक्षयज्ञाय। दक्षाध्वरनाशकाय । दक्षयज्ञान्तकाय । दक्षयागापहारिणे । दक्षयज्ञहराय । दक्षमखान्तकाय । दक्षारये । दक्षाध्वरान्तकाय नमः। ३१२०

दक्षयज्ञप्रभंजकाय नमः । दक्षाध्वरविनाशनाय । दक्षाराध्याय। दक्षयज्ञविनाशनाय । दक्षिणाय । दक्षादक्ष समर्चिताय। दक्षिणावभृथाय। दक्षिणामूर्तये। दक्षिणाकराय। दक्षिणे। दक्षिणाराध्याय। दक्षिणप्रेमसन्तुष्टाय। दक्षिणावरदाय। दक्षिणामूर्तिरूपधृते। दाक्षिण्यशीलाय। दाक्षायणीसमाराध्याय। दीक्षाशालिने। दीक्षारये। दीक्षिताय। दीक्षिताभीष्टदाय नमः। ३१४०

धकारस्य धन्वतरिर्देवता। विषज्वरविनाशने विनियोगः।

ध्वजिने नमः। ध्वजिनीपतये। धृतिमते। धात्रे। धात्रीशाय। धातुमण्डिताय। धात्रीपतये। धितिकृते। धनदेशाय। धनदाय।

धनाधिपाय। धनदाध्यक्षाय। धनकृते। धनधान्यसमृद्धिदाय। धनुर्वेदाय। धन्विने। धन्याय। धनुषे। धनाध्यक्षाय। धनंजयाय नमः। ३१६०

धनुर्हस्ताय नम:। धनाय। धन्वन्तरये। धनेश्वराय। धनमालाधराय। धनाकराय। धनदप्रियाय। धनप्रियाय। धनुर्धराय। धनागमाय। धन्याय। ध्वनये। ध्यानगम्याय। ध्यानरूपाय। ध्यानाय। धीमते। धूम्राय। धूमकेतनाय। धूमकेतवे। धूमपाय नमः। ३१८०

धूम्रवर्णाय नमः। धूम्राक्षाय। ध्यायते। ध्येयाय। ध्येयगम्याय। ध्येयध्यानाय। ध्येयानामपि ध्येयाय। ध्येयतमाय। धर्माय। धर्मिष्ठाय। धर्मयुक्ताय। धर्मचारिणे। धर्मसेतुपालकाय। धर्माधाराय। धर्मधाम्ने। धर्मराजाय। धराय। धर्मपीठाय। धर्मार्थिकामकैवल्य सूचकाय। धर्मवृक्षाय नमः। ३२००

धर्मसाधारणाय नमः। धर्माद्यिष्टपरायणाय। धर्माध्यक्षाय। धर्माधिगम्याय। धर्मार्थिकाममोक्षाणां बीजरूपाय। धर्मवक्त्रे। धर्मवते। धर्मनिपुणाय। धर्मप्रवर्तकाय। धर्माधर्मप्रवर्तकाय। धर्मकर्मणे। धर्मधेनवे। धर्मवर्धनाय। धर्मात्मने। धर्मदायिने। धर्मनायकाय। धर्मनिश्चयाय। धर्मौदनप्रदाय। धरणीधारकाय। धराय नमः। ३२२०

धर्षणात्मने नमः। धरोत्तमाय। धराधात्रे। धरणीधराय। धराधीशाय। धार्मिकाय। धारणाय। धारणाभिरताय। धारणाभ्यासिनां पुरः स्थिताय। धीराय। धीरविमोचकाय। धीधारकाय। धुर्याय। धुरीणाय। धुरन्धराय। धूर्जटये। धूर्वहाय। धैर्याग्रधुर्याय। धैर्यदाय। धैर्यवर्धकाय नमः। ३२४०

धैर्यविभूषिताय नमः । धौरेयाय । धवलश्यामरक्तानां मुक्तिदाय । ध्रुवाय । ध्रुवबद्धानामृषीणां प्रभवे । ध्रुवनिषण्णानामृषीणां पतये । धृष्टये । धृष्णवे । धृष्टेश्वराय । ध्वस्तमनोभवाय नमः । ३२५०

नकारस्य विनायको देवता । विघ्ननाशने विनियोगः ।

नकार रूपाय नमः । नक्ताय । नक्तंचराय । नाकेशपूज्याय । नैकस्मै । नैकसानुचराय । नैकात्मने । नैककर्मकृते । नैकशृंगाय । नखच्छिन्नात्मभूशीर्षाय नमः ३२६०

नखांशुचयनिर्धूततारेशाय । निखिलागमसंसेव्याय । नगरप्रियाय । नगाय । नग्नाय । नग्नवेषधराय । नग्नव्रतधराय । नगेन्द्रकन्यकापांगवीक्षिताय । नगेन्द्रतनयासक्ताय । नगेन्द्रतनयाप्राणवल्लभाय । नगेन्द्रतनयाप्रियाय । नगप्रवरमध्यस्थाय । नागवाहनाय । नागनाथाय । नागहाराय । नागहस्ताय । नागालंकृतपादाय । नागेश्वराय । नागनारीवृताय । नागचूडाय नमः । ३२८०

नागांगाभरणाय नमः । नागभोगोपवीताय । नागयज्ञोपवीताय । नागकंकणहस्ताय । नागरूपाय । नागकंकणाय । नागहारधृते । नागकुण्डलकर्णाय । नागाभरणभूषिताय । नागराजैरलंकृताय । नागेन्द्रयज्ञोपवीतशोभिताय । नागेन्द्रवदनाय । नागेन्द्रहाराय । नागेन्द्रदमनाय । नागेन्द्रभूषणाय । न्यग्रोधरूपाय । न्यग्रोधवृक्षकर्णस्थिताय । निगमाय । निगमालयाय । निगमाचारतत्पराय नमः । ३३००

निगमोच्छ्वासाय नमः । निग्रहाय । निचेरवे । निजाय । निजात्मने । निजपादाम्बुजासक्तसुलभाय । निजाक्षिजाग्नि-

संदग्धत्रिपुराय । नटाय । नटवराय । नटचर्याय । नटवर्याय । नटप्रियाय । नटनाख्योत्सवोल्लासहृदयाय । नित्याय । नित्यानां नित्याय । नित्यतृप्ताय । नित्यनर्तनाय । नित्यमाश्रमपूजिताय । नित्यनीतिशुद्धात्मने । नित्यवर्चस्विने नमः । ३३२०

नित्यनित्याय नमः । नित्यानन्दाय । नित्यमुक्ताय । नित्यशक्तिशिरसे । नित्यमुग्राय । नित्यमधिवासितसुवाससे । नित्यचरात्मने । नित्यमुद्बुद्धमकुटाय । नित्यसुन्दराय । नित्यज्ञानाय । नित्यवैराग्याय । नित्यैश्वर्याय । नित्यसत्याय । नित्यधृतधैर्याय । नित्यक्षमाय । नित्यस्वस्थाय । नित्यात्मबोधाय । नित्यादिष्टाश्रयत्वाय । नित्यशुद्धाय । नित्योत्साहाय नमः । ३३४०

नित्यानन्दस्वरूपकाय नमः । नित्यमंगलविग्रहाय । नित्यानपायमहिम्ने । नित्यबुद्धाय । नित्यक्रुद्धाय । नित्यमंगलाय । नित्यनीतिशुद्धात्मने । नीतिमते । नीतिकृते । नीतिविदे । नीतिवत्सलाय । नीतिस्वरूपाय । नीतिसंश्रयाय । नीतये । नीतिमतां श्रेष्ठाय । नीतिज्ञाय । नीतिकुशलाय । नीतिधराय । नीतिवित्तमाय । नीतिप्रदात्रे नमः । ३३६०

नीतिवित्प्रियाय नमः । नुतिप्रियाय । नृत्यते । नृत्यशीलाय । नृत्यप्रियाय । नृत्तस्थिताय । नित्यनृत्याय । नेत्रे । नेत्रसहस्रयुक्ताय । नदते । नदीप्रियाय । नदीधराय । नदीपुलिनसंस्थिताय । नदीरूपाय । नदीभर्त्रे । नदीनां प्रभवे । नदानां प्रभवे । नादाय । नादानुभवरूपाय । नादमध्ये स्थिताय नमः । ३३८०

नादाक्षरवदनाय नमः । नादरूपाय । नादबिन्दु कलातीताय । नादमनोहराय । नादबिन्दुकलात्मकाय । नादमार्गप्रबुद्धाय । नादाकाराय । नादान्ताय । नादात्मने । नन्दिने ।

नन्द्यावर्तसुमार्चिताय। नन्द्याय। नन्दिवाहनाय। नन्दिभृंगिमुखानेकसंस्तुताय। नन्दनाय। नन्दीश्वरप्रमथनाथमहेश्वराय। नन्दिवर्धनाय। नंदये। नन्दिविद्यास्वरूपाय। नन्दिकराय नमः। ३४००

नन्दीश्वराय नमः। नन्दिचक्रांकिताय। नन्दिवक्त्राय। नन्दिकेश्वराय। नन्दिनिलयाय। नन्दिताशेषभुवनाय। नन्दिकेशसमाराध्याय। नान्दीश्राद्धप्रियाय। निदाघाय। नेदिष्ठाय। नाथाय। निधये। निधिविदामर्थेश्वराय। निधिपतये। निधिप्रदाय। निधिरूपकाय। निधनाय। निधनाधिपाय। नानाभुवनाधिकर्त्रे। नानाजगतां विधात्रे नमः। ३४२०

नानाविधायुधोद्भासिदशबाहवे नमः। नानादिशैकनायकाय। नानागानविशारदाय। नानारूपधराय। नानामन्त्ररहस्यविदे। नानाशास्त्रविशारदाय। नानाक्रतुविधानज्ञाय। नानाभीष्टवरप्रदाय। नानाविधानेकरत्नलसत्कुण्डलमण्डिताय। नानाविद्यैकसंश्रयाय। नानाभूतधराय। नपुंसकाय। निपुणाय। निपुणप्रियाय। निपातिने। नीपप्रियाय। नभोरूपाय। नभःस्थलाय। नभस्याय। नभस्पतये नमः। ३४४०

नभोयोनये नमः। नाभये। नाभिमण्डलसंस्थाय। नमःशिवायमन्त्राधिदैवताय। नमस्कारप्रियाय। नम्राय। नमन्निलिंपनायकाय। नमिताचलनायकाय। नामरूपविवर्जिताय। नामसंकीर्तनप्रियाय। नामरहिताय। नामरूपक्रियात्मने। नामप्रियाय। नामपारायणप्रीताय। निमित्ताय। निमित्तस्थाय। निमिषाय। निमेषप्रभवे। नैमिशारण्यनिलयाय। नैमित्तिकार्चनप्रीताय नमः। ३४६०

नयाय नमः । नयज्ञाय । नयनोद्भूतदहनालीढमन्मथाय । नयनाग्निप्लुष्टमारशलभाय । नायकाय । न्यायाय । न्यायनिर्वाहकाय। न्यायनिर्वहणाय । न्यायगम्याय । नियताय । नियतात्मने । नियमाय। नियमाश्रयाय । नियतकल्याणाय । नियमाध्यक्षाय । नियन्त्रे । नियमितेन्द्रियवर्धनाय । नरनारीशरीराय । नरसिंहमहाकोपशमनाय। नरनारायणाय नमः। ३४८०

नरसिंहाय नमः । नरसिंहनिपातनाय । नरसिंहमहादर्पघातिने। नरसिंहार्चितपदाय । नरवृषभाय । नरशिरोरचितमणिकुण्डलाय । नरवरयुवतीवपुर्धराय। नरकाय। नरवाहनाय । नरक्लेशशमनाय । नरेशाय । नरकान्तकाय । नरनाथप्रियाय । नरकान्तकरामोघसायकाय । नरनारायणार्चिताय। नराय । नराधिपाय । नर्तकाय । नर्तनवित्प्रियकारिणे । नर्तनवादप्रियाय नमः । ३५००

नरापद्वारिदव्रातवातूलाय नमः । नर्मालापविशारदाय । नरकण्ठीरवध्वंससन्नद्धशरभाय। नारायणाय। नारीनरशरीराय। नारदादिमुनीश्वरस्तुतवैभवाय । नारायणप्रियाय । नारदादिसमाराध्याय । नारीमानसमोहनाय । नारदाय । नारदादिमहायोगिवृन्दसेविताय । नारायणसमाश्रिताय । निर्मलाय। निर्लेपाय। निर्विकल्पाय। निरहंकारिणे। निरंजनाय। निराधाराय। निरक्षराय। निरामयाय नमः । ३५२०

निरातंकाय नमः। निरालम्बाय । निरीशाय। निरवद्याय। निरीहाय । निर्वाणाय । निर्गुणाय । निर्मायाय । निरालयाय । निरालोकाय । निरवग्रहाय । निर्जीवजीवनाय । निरजाय । नीरजाय। निर्विकल्पार्थरूपिणे। निर्गुणतत्वरूपाय। निरंगाय। निरंतरपरमानन्दपदाय। निराभासाय। निर्मलज्ञानविग्रहाय नमः। ३५४०

निर्विकाराय नमः । निरुपद्रवाय । निरवधिककरुणाय । निर्द्वंद्वाय । निर्लिप्ताय । निरवधिविभवाय । निरुपाधिकाय । निराकाराय । निर्दयाय । निर्बीजाय । निराशिषे । निरुत्पत्तये । निरावरणधर्मज्ञाय । निर्व्याजाय । निर्व्यग्राय । निरवद्यपदोपायाय । निर्गुणस्थाय । निर्मलप्रभाय । निर्मलभासितशोभितलिङ्गाय । निरंकुशाय नमः । ३५६०

निर्मदाय नमः । निरानन्दाय । निर्मलस्फटिकाकृतये । निर्विशेषायापि वियदिन्द्रचापवत्तेजोमयवपुषे । निर्गुणायापि गुणत्रयात्ममाया शबलत्वप्रकटनाय । निर्वृतिकारणाय । निरास्पदायापि स्वयं सर्वाधाराय । निर्मर्यादाय । निरुद्योगाय । निरुपमाय । निर्भयाय । निरपायाय । निलिम्पनायकाय । नीलजीमूतनिस्वनाय । नीलचिकुराय । नीलरुचये । नीलकण्ठाय । नीललोहिताय । नीलकेशाय । नीलाय नमः । ३५८०

नीलमौलये नमः । नीलग्रीवाय । नीलशिखण्डाय । नीलगलाय । नवशक्तिमते । नवहाटकनिर्माणकिंकिणी-दामशोभिताय । नवनिधिप्रदाय । नवग्रहस्वरूपिणे । नवग्रहार्चितपदाय । नवरत्नगणोपेतकिरीटाय । नवरत्नगुणोपेत-दिव्य नूपुरभूषिताय । नवचक्रमहापद्मसंस्थिताय । नवस्थलस्थभक्तैकोपासिताय । नवलिङ्गमयाकारशोभिताय । नवकोटिगणाराध्यपादुकाय । नवनन्दीश्वरस्तोत्रपरीताय । नवनाथार्पितानन्दकटाक्षाय । नवब्रह्मशिखोत्तंसविज्ञाताय । नवनीतादिमृदुलमानसाय । नवनारायणाश्रांतनिध्येयाय । ३६००

नवमोहतमः पंकक्षालनाय नमः । नवसिद्धसमाराध्याय । नवब्रह्मार्चितपदाय । नवनागनिषेविताय । नवदुर्गार्चनप्रियाय । नवसूत्रविधानविदे । नवर्षिगणसेविताय । नवचन्दनलिप्ताङ्गाय ।

नवचन्द्रकलाधराय । नववस्त्रपरीधानाय । नवरत्नविभूषिताय । नवभस्मविदिग्धांगाय । नवबंधविमोचकाय । नवनीतप्रियाहाराय। नव्यहव्याग्रभोजनाय । नवफालमणये । नवाय । नवात्मने। नवात्मतत्वरूपाय । नंवामबाहुकटीतटाय नमः । ३६२०

निवेदनाय नमः । निवेष्ट्याय । निव्याधिने । निवृत्तात्मने । निवृत्तये । निवृत्तिकलात्मकसर्वाङ्गाय । नाशारूढाय । निशाचराय। निशाचारिणे । निशाकराय । निशालयाय । निशाचाराय। निशाचरगणाकृतये। निश्चलाय। निशुम्भघ्नाय। निश्वासागमलोचनाय । निःश्रेयसालयाय । नष्टशोकाय । निषंगिणे । निष्कलायापि सकलाय नमः । ३६४०

निष्कलंकाय नमः । निष्कारणोदयाय । निष्क्रियाय । निष्कंटकाय । निष्प्रपंचाय । निष्प्रपंचात्मने । निष्प्रभाय । निष्ठाशान्तिपरायणाय । नासालोकनतत्पराय । नासाग्रन्यस्तनिटिलनयनाय । नासापुटविभ्राजितमौक्तिकाय । नासामणिविराजिताय । निस्संगाय । निःस्पृहाय । निःस्थूलरूपाय। निस्तुलौदार्यसौभाग्यप्रबलाय। निसर्गामलभूषणाय। निस्तुलाय। निस्तरंग समुद्राभाय। नृसिंहसंहन्त्रे नमः । ३६६०

नृसिंहचर्माम्बरधराय नमः । निहिताय । निहन्त्रे । नलिनीदललग्नाम्बुनिर्लेपाय। नक्षत्रमालिने। नक्षत्रमालाभूषणाय। नक्षत्रविग्रहमतये । नक्षत्राणां चन्द्रमसे । नक्षत्रनाथसहस्रभासुराय । नक्षत्रसाधकाय नमः । ३६७०

पकारस्य वायुर्देवता। पुष्ट्यर्थे विनियोगः ।

पंकजासनपद्मलोचनपूजितांघ्रिसरोरुहाय नमः । पंकजहारसुशोभितलिङ्गाय । प्रकाशाय । प्रकाशात्मने । प्रकटाय ।

प्रकृतिदक्षिणाय । प्रकृतेशाय । प्रकृत्यै । प्रकृत्युपगूढरूपाय । प्रकृतीशाय नमः । ३६८०

प्रकृतिकल्याणाय नमः । प्रकृतिसाधकाय । प्रकृतिदूरांघ्रये । प्रकृतिसुन्दराय । प्रकृतिमनोहराय । प्रकृन्तानां पतये । प्रकृखिदते । प्रगल्भाय । प्राग्दक्षिणोदङ्मुखाय । पाँसव्याय । पिंगलजटाय । पिंगलाय । पिंगलाक्षाय । पिंगकपर्दिने । पुंगवकेतवे । पञ्चब्रह्मात्मकसदालिङ्गाय । पञ्चब्रह्मात्मकवचाय । पञ्चसादाख्य-वदनाय । पञ्चकलात्मकसर्वाङ्गाय । पञ्चमूर्त्यात्मने नमः । ३७००

पञ्चमूर्त्यात्मकवदनाय नमः । पञ्चविंशतिमूर्ति प्रतिपाद-कोर्ध्व वदनाय । पञ्चविंशतिमूर्त्यात्मने । पञ्चशक्त्यु-दिताय । पञ्चभूषणाय । पञ्चकप्रियाय । पञ्चाक्षराय । पञ्चास्याय । पञ्चयज्ञाय । पञ्चविंशतितत्वज्ञाय । पञ्चब्रह्मसमुत्पत्तये । पञ्चवक्त्राय । पञ्चशीर्षाय । पञ्चयज्ञप्रभंजनाय । पञ्चवर्णाय । पञ्चदशचक्षुषे । पञ्चदशहस्ताय । पञ्चतन्मात्ररूपाय । पञ्चभूतात्मने । पञ्चकर्मेन्द्रियात्मने नमः । ३७२०

पञ्चार्धहेतवे नमः । पञ्चास्यरुद्ररूपाय । पञ्चाशत्कोटि-मूर्तये । पञ्चमन्त्रस्वरूपिणे । पञ्चमाय । पञ्चास्यफणिहाराय । पञ्चाक्षरमयाय । पञ्चाक्षरीदृशे । पञ्चार्थविज्ञानसुधास्रोतः स्वरूपिणे । पञ्चपादपपुष्प गंधि-पदाम्बुजद्वयशोभिताय । पञ्चाननाय । पञ्चमुखाय । पञ्च-भूताधिपतये । पञ्चास्रहराय । पञ्चपातकसंहाराय । पञ्चाम्नाय-स्वरूपिणे । पञ्चकोशस्वरूपाय । पञ्चभूताधिवासाय । पञ्चाक्षरनिवासिने । पञ्चप्राणाय नमः । ३७४०

पञ्चब्रह्मस्वरूपिणे नमः । पञ्चवक्त्राय । पञ्चमूर्धाभि-संयुक्ताय । पञ्चवदनाय । प्राच्याय । प्राचीनपुरुषाय । प्राच्यात्मने ।

प्रचेतसे । प्रचुरदिव्याग्नये । प्रचुरदण्डहस्ताय । प्राचीनानामपि गिरामगोचराय । प्राचीनपुण्यपुरुषाय । पाञ्चरात्राणां विष्णवे । प्रच्छन्नाय । प्रच्छन्नस्फटिकप्रभाय । प्रच्छन्नरूपाय । पुच्छिने । प्रजाध्यक्षाय । प्रजापतये । प्रजाभवाय नमः । ३७६०

प्रजापालाय नमः । प्रजाबीजाय । प्रजनेशाय । प्रजानां परहेतवे । प्रजानां व्यूहहेतवे । प्रजापतीनां पतये । प्रजापतिपतये । प्रज्वालिकायां गिरिजासमेताय । पुंजिष्टेभ्यः । पूज्याय । प्रज्ञाप्रदाय । प्रज्ञानघनरूपिणे । प्रज्ञारूपाय । प्राज्ञपूज्याय । प्राज्ञाय । पटवे । पट्टसिने । पट्टसरूपधारिणे । पीठत्रयस्वरूपिणे । पण्डिताय नमः । ३७८०

पाण्ड्यसुन्दराय नमः । पाण्डवे । पाण्डुराख्याय । पाण्डुराङ्गाय । पुण्डरीकनिभेक्षणाय । पुण्डरीकनयनाय । प्रौढाय । पणविने । प्रणवस्वरूपाय । प्रणवार्थाय । प्रणवादिमन्त्र-जनकोर्ध्ववदनाय । प्रणवाक्षरहृदयाय । प्रणवमन्त्रात्मने । प्रणवात्मकाय । प्रणवाय । प्रणतार्तिघ्नाय । प्रणवप्रणवेशाय । प्रणतभक्तजनार्तिहराय । प्रणतार्तिहराय । प्रणीतपञ्चार्थ-प्रयोगपरमामृताय नमः । ३८००

प्राणायामरतानां प्रत्यक्षाय नमः । प्राणाय । प्राणपालाय । प्राणापानाय । प्राणदाय । प्राणधारणाय । प्राणिनां प्रभवे । प्राणमयाय । प्राणानां सुहृदे । प्राणेश्वराय । प्राणापानप्रवर्तिने । पुण्याय । पुण्यचंचुरिणे । पुण्यशालिबन्धवे । पुण्यफलिताय । पुण्यश्रवणकीर्तनाय । पुण्यकीर्तये । पुण्यमूर्तये । पुण्यशरण्याय । पुण्यदात्रे नमः । ३८२०

पुण्यापुण्यफलप्रदाय नमः । पुण्योदयाय । पतिनामकलया-दिव्यापारत्रयलक्षितशक्तिमदात्मने । पताकाध्वजिनीपतये । पततां

गरुडाय । पतंजलिव्याघ्रपादसन्नुताय। पतंगपंकजासुहृत्कृ-पीटयोनिचक्षुषे । पत्तीनां पतये । पत्तीशाय । प्रतिसद्याय । प्रतिश्रवाय । प्रतीचात्मने। प्रणतार्तिभंजनाय । प्रतापाय। प्रत्यगात्मकाय । प्रतिसर्याय । प्रतिष्ठिताय । प्रतापनाय। प्रतापवते। प्रतिष्ठाकलात्मकनाभ्यादिकाय नमः। ३८४०

प्रत्याहाराय नमः । प्रत्याहाररताय । प्रत्याहाररतानां प्रतिस्थानस्थिताय। प्रतिदधानेभ्यः। प्रतिश्रवाय। प्रतरणाय। प्रत्युदीर्णाय। प्रत्यगात्मने। पातालवासिने। पातालनरकेशाय। पातंजलानां शाब्दाय। पात्राय। पातित्यसंहर्त्रे। पित्रे। पितॄणां पित्रे । पितामहाय । पितृमात्रे । पितामहशिरश्छेद-प्रवीणकरपल्लवाय। पितॄणां पतये। पीताय नमः। ३८६०

पीतवर्णाय नमः। पीतवदनाय। पीतशुक्लाय। पीतच्छत्राय। पीतवाससे । पीतांबरधराय । पीतांबरविभूषणाय । पीततरुणपूर्ववदनाय । प्रीताय । प्रीतवदनाय । प्रीतिमते । प्रीतिवर्धनाय। पुत्रपूजिताय। पुत्रदाय। पुत्रिणे। पूतात्मने। पूतानां प्रभवे। प्रेतचारिमहाशक्तये। प्रेतमनसे। प्रेतासनाय नमः। ३८८०

प्रेतचारिणे नमः। प्रेतात्मने। प्रेतानां पुरहर्त्रे। पथ्याय। पथीनां पतये। प्रथमाय। पृथिव्यै। पृथिवीव्यापिने। पृथिव्यात्मने। पृथ्वीपतये । पृथ्वीरथाय । पृथ्व्यादितत्वप्रतिष्ठिताय । पदक्षिणकरांगुलिकाय । पद्मेश्वराय । पद्मनिधये । पद्मिनीवल्लभप्रियाय। पद्मनाभाय। पद्मालयाय। पद्मगर्भाय। पद्मकिंजल्कसन्निभाय नमः। ३९००

पद्मप्रियाय नमः। पद्महस्ताय। पद्मलोचनाय। पद्मासनाय। पद्मार्थमालाय । पद्मनालाग्राय । पद्मपादाय । पद्माय ।

पद्मावतीप्रियाय। पद्मपराय। पद्मवर्णाय। पद्मिनीपतिदंतालिदमनाय। पद्मासनरताय। पद्माभवक्त्रनेत्राय। प्रदीप्तविद्युत्कनकावभासाय। प्रदीपाय। प्रदीपविमलाय। प्रदक्षिणे। प्रदानात्मने। पद्यगद्यविशारदाय नमः। ३९२०

पादाय नमः। पादाध्वनीरमांसादिकाय। पादापस्मृतिसंहर्त्रे। पादहीनाय। पादिमेढ्राय। पादशुश्रूषणासक्तनाकनारीसमावृताय। पादभिन्नाहिलोकाय। प्रधानाय। प्रधानपुरुषाय। प्रधानपुरुषेशाय। प्रधानप्रभवे। प्रधानधृते। पन्नगाय। पन्नगांकाभाय। पन्नगारातये। पिनाकिने। पिनाकाय। पिनाकधृते। पिनाकभृते। पिनाकहस्ताय नमः। ३९४०

पंपद्मविशालाक्षाय नमः। प्रपन्नदुःखनाशिने। प्रपञ्चनाशकल्पान्तभैरवाय। प्रपथ्याय। प्रपितामहाय। प्रपञ्चनामकाव्यक्तादिपृथिव्यन्तात्मने। पापघ्नाय। पापहारिणे। पापारये। पापनाशनाय। पापनाशकराय। पापराशिहराय। पापनाशाय। प्रफुल्लनीलपंकजप्रपञ्चकालिमप्रभाविडंबिकंठकंदलीरुचिप्रबद्धकन्धराय। प्रभवे। प्रभंजनाय। प्रभाकराय। प्रभवाय। प्रभिन्नाय। प्रभावाय नमः। ३९६०

प्रभूतप्राशिताय नमः। प्रभामण्डलमण्डिताय। प्रमथाय। प्रमथाधिपाय। प्रमथ्याय। प्रमथनाथाय। प्रमथस्वामिने। प्रमथभूतगणसेविताय। प्रमथादिनाथाय। प्रमथेशाय। प्रमथेन्द्रावृताय। प्रमाणाय। प्रमाणभूताय। प्रमाणज्ञाय। प्रमाणबाधादिविवर्जिताय। प्रमथिने। प्रमाथिने। प्रमुदितात्मने। प्रमुदिताय। प्रमृशाय नमः। ३९८०

प्रमोदाय नमः। पयोनिधये। प्रयोगाय। प्रियव्रताय। प्रियव्रतसमाराध्याय। प्रियाराध्याय। प्रियकृते। प्रियसम्मताय।

प्रियभक्ताय। प्रियंवदाय। प्रियाय। प्रियकराय। प्रियदर्शनाय। प्रियंवदश्रेष्ठाय। प्रियसंदर्शनाय। प्रियनारायणाय। प्रियकैलासाय। प्रियभूषणाय। परिच्छेद रहिताय। पराशरवसिष्ठ मार्कंडेयापस्तंबबोधायनवर्गदीक्षकागस्त्यादिपञ्चदीक्षागुरु भूतपञ्चकवदनाय नमः। ४०००

परार्थजापकब्रह्मबंधुसद्बंधवे नमः। परमेश्वरागमहाराय। परब्रह्मणे। परमूर्तये। परात्पराय। परामोदाय। परमधार्मिकाय। परमाय। परमार्थाय। परविद्याविकर्षणाय। परमेशाय। परायणाय। परार्थविदे। पररहस्यविदे। परचक्रघ्नाय। परपुरञ्जयाय। परमेष्ठिने। परार्थैकप्रयोजनाय। परिवृताय। परश्वधिने नमः। ४०२०

परावराय नमः। परमात्मने। परस्मै। परमयाय। पराजयाय। पराशराय। परावरपराय। परकायकपण्डिताय। परार्थवृत्तये। परमार्थगुरवे। परश्वधायुधाय। परिधीकृत खेचराय। पर्यायाय। परानतये। परमेशानाय। परिवञ्चकाय। परिचराय। पर्णशाय्याय। पर्ण्याय। परापरेशाय नमः। ४०४०

परदाय नमः। परसूक्ष्मात्मने। परेशाय। परमाणवे। परशुधारिणे। परज्योतिःस्वरूपिणे। परश्वधलसद्दिव्य-कराब्जाय। परानन्दस्वरूपार्थबोधकाय। परार्थस्य प्रभवे। परार्थ प्रभवे। परस्य प्रभवे। परमात्मस्वरूपिणे। परमलिङ्गाय। परिहाराय। परश्वधभृते। पर्वतरूपधारिणे। परमशिवाय। परमात्मभूताय। परायणाय। परस्मै धाम्ने नमः। ४०६०

पर्वतानां मेरवे नमः। परेषां परमेश्वराय। परिधानाय। परश्वधधारिणे। परल्यां वैद्यनाथाय। परात्परलिंगाय।

परमात्मकलिंगाय। परानंदमयाय। परमप्रकाशाय। परमशान्त-स्वरूपाय। परात्मने। परमदेवाय। परमहेतवे। परमैश्वर्य-संपन्नाय। परमतत्वाय। परमकल्याणनिधये। परिपूर्णाय। पर्वतराजेन्द्रकन्यकापतये। परशुमृगवरदाभयहस्ताय। परापर-ज्ञाय नमः। ४०८०

परिपूर्णपरानंदाय नमः। परचित्सत्यविग्रहाय। परानंदप्रदायकाय। पर्वताधीशजामात्रे। परिपूर्णाय। परिवश्वते। परमपदाय। परशवे। परितोऽपि विद्यमानाय। परब्रह्मस्वरूपिणे। पार्वतीरमणाय। पार्वतीशाय। पार्वतीपतये। पारिजाताय। पारिजातसुपुष्पाय। पार्वतीमनोहरप्रियाय। पार्वतीहृदयवल्लभाय। पारिजातगुणातीतपादपंकजवैभवाय। पार्वतीप्राणरूपिणे। पाराय नमः। ४१००

पारिषदप्रियाय नमः। पार्याय। प्रारब्धजन्ममरण-मोचकाय। प्रार्थितदायिने। पुरातनाय। पुराणाय। पुरुषाय। पुराणपुरुषाय। पुराणागमसूचकाय। पुराणवेत्रे। पुरुहूताय। पुरुष्टुताय। पुरुजिते। पुरुषेशाय। पुरंदराय। पुरत्रयविघातिने। पुराणप्रभवे। पुराणवृषभाय। पुरस्ताद्बृंहते। पुरघ्नाय नमः। ४१२०

पुरेशयाय नमः। पुराणलिंगाय। पुरुषलिंगाय। पुरच्छेत्रे। पुरान्तकाय। पुरुषश्रेष्ठाय। पुरत्रयारये। पुरारये। पुरत्रयरिपवे। पुरत्रयनाशाय। पुरंदरनुतांघ्रये। पुरंदरवरप्रदाय। पुरंदरविमानगाय। पुरहराय। पुरवैरिणे। पुरच्छिदे। पुरस्त्यादिमहद्दिव्यपञ्चब्रह्ममुखान्विताय। पुरुनाम्ने। पुरुरूपाय। पुरुषोत्तमरूपाय नमः। ४१४०

पूर्णरूपाय नमः । पूर्णानंदाय । पूरयित्रे । पूर्वजाय । पूर्तमूर्तये । पूर्णाय । पूर्वाय । पल्लविने । प्रलंबभोगीन्द्रलुलुन्तकंठाय । पालनतत्पराय । पालाशकृन्तते । पालाधिपतये । पुलस्तये । पुलस्त्याय । पुलहाय । पवनवेगाय । पवनरूपिणे । पवनाशनभूषणाय । पवित्राय । पवित्रदेहाय नमः । ४१६०

पवित्रपाणये नमः । प्रवराय । प्रवृत्तये । प्रवीणविविधभूतपरिष्कृताय । प्रवालशोणाधराय । प्रवाहाय । प्रवाह्याय । प्लवनाय । पावकाय । पावकाकृतये । पावनाय । पावाय । प्रावृडाकाराय । प्रावृट्कालप्रवर्तकाय । प्रावृट्कृते । प्रावृण्मयाय । प्रावृड्विनाशकाय । प्रांशवे । पशुनामकसकलादिभेदबंधत्रयात्मने । पशुपतये नमः । ४१८०

पशूपहाररसिकाय नमः । पशुमंत्रौषधाय । पश्चिमाय । पशुघ्नाय । पशुपाशनाशिने । पशुस्थाय । पाशाय । पाशहराय । पाशनामकसकलादिक्षित्यन्तब्रह्मात्मने । पाशहस्ताय । पाशिने । पाशमोचनाय । पाशांकुशाभयवरप्रदशूलपाणये । पाशत्रिशूलखट्वांगकुरंगधराय । प्रशस्ताय । प्रशस्तचारुविग्रहाय । प्रशान्ताय । प्रशान्तात्मने । प्रशान्तबुद्धये । प्रांशुज्योतिषे नमः । ४२००

पिशिताय नमः । पिशंगाय । पिशिताशाय । पिशाचानुचरावृताय । पश्यल्ललाटाय । पशुपाशविमोचनाय । पश्यतोहराय । पशुपालकाय । प्रशान्ताय । प्रशंस्याय । प्रशंसनीयाय । प्रशंसाविषयाय । प्रशंसापात्राय । प्रशस्तगुणसिन्धवे । प्रशस्तयशसे । प्रशान्तमूर्तये । प्रशासितभुवनाय । प्रशासितकन्दर्पाय । प्रशान्तमुनिगणस्तुताय । प्रश्नाय नमः । ४२२०

पृश्निगर्भाय नमः । प्रश्रिताय । प्रश्रितप्रियाय । प्रश्रितजनरक्षकाय । प्रश्रिताभीष्टकराय । प्रशितिमोचकाय । प्रशितिहराय । प्रशितिकराय । प्रशितिनिवारकाय । पाशलीलारताय। पाशहस्ताय । पाशायुधनिषेविताय । पाशकप्रियाय । पाशिने । प्रांशुबाहवे । प्रांशुमूर्तये । प्राशितगरलाय। प्राशासितभुवनाय । पाशकविहारनिरताय । प्राशितश्रवणप्रियाय नमः । ४२४०

प्राशितमुदितान्तरंगाय नमः । पाश्याबद्धजनभीतिहृते । पाश्चात्यपूजिताय । पाश्चात्यवदनांचिताय । पाश्चात्यवरदाय । पाशुपाल्यव्रतधराय। पिशाचगणसेविताय। पिशाचिकगणेशाय। पिशुनाय। पिशुनांतकाय। पिशिताशनवरदाय। पिशिताशनेन्द्र-पूजिताय । पिशिताशहृते । पिशितभुग्दंडनपण्डिताय। पिशंग-लोचनाय । पिशंगजटाजूटाय । पिशितामोदितांगाय । पिशित-चूर्णोत्सवप्रियाय। पिशितवासनावासिताय। पिशुनांचितचन्दन-चर्चितांगाय नमः । ४२६०

पिशुनगंधप्रियाय नमः । पिशुनपंकाभिषिक्ताय। पुंश्चली-दूराय। पुंश्चलीकृतमुनिभार्याय । पुंश्चलीदोषनिर्मुक्तमुन्यंगनाय। पुंश्चलीप्राणनाथाय । पेशलाय । पेशलांगाय । पेशलगुणाय । पेशीपिहितखड्गाय । पेशीकोश पोषकाय। पेशीकोशगर्भाय । पेशीकोशीभूतभुवनाय । पेशी प्रियाय। पाषाणभेदकायुधाय । पाषाणगैरिक वर्णाय । पाषाणगर्भकदोषहीनरत्न कुंडलाय । पाषंडजनदूराय। पाषंडिमदहराय। पाषाण कठिनोरस्काय नमः । ४२८०

पाषाण दलनक्षमवज्रहस्ताय नमः । पार्ष्णिप्रियाय। पार्ष्णि गोपीलसिताय। पिष्टातधूलिधूसराय। पिष्टातचूर्णोत्सवप्रियाय।

पिष्टपिशिताशनाय। पिष्टभक्ताघाय। पुष्टभक्तजनाय। पुष्टिकराय। पुष्पकप्रियराजराजसखाय। पुष्पमंजरीमण्डिताय। पुष्पवाटिका विहार कुतुकिने। पुष्परागमणिमकुटशोभिताय। पुष्परागपूर्ण कुण्डलाय। पुष्पपुच्छीप्रीतिपूर्णाय। पुष्पपुच्छी पूजिताय। पुष्पपुच्छी प्रियंकराय। पुष्पपुट कमलार्चिताय। पुष्पाञ्जलि पूजिताय। पुष्पधूलीधूसरचरणाय नमः। ४३००

पुष्पमालिकाविराजमानाय नमः। पुष्कराक्षाय। पुष्करांबराय। पुष्करमूर्तये। पुष्करकेशाय। पुष्करेक्षणाय। पुष्पदंतवरदाय। पुष्पवद्रूपलोचनाय। पुष्कलावर्तकनायक-स्तुताय। पुष्कलाय। पुष्कलगुणाभिरामाय। पुष्करिणी प्रियाय। पुष्करिणी प्राणदाय। पुष्करिणी तीरवासिने। पुष्करक्षेत्रपालाय। पुष्करेशाय। पुष्पकेतुहराय। पुष्पकेतुप्रियाय। पुष्पदंताख्य गंधर्ववरदाय। पुष्पदंतपूजिताय नमः। ४३२०

पुष्पेषुप्राणहराय नमः। पुष्पबाणपुरन्ध्रीपूजिताय। पुष्प-शरकामिनीसेविताय। पुष्पेषुपत्नीवरदाय। पुष्परथाधिरुढाय। पुष्परथारोहकौतुकिने। पुष्कर वर्मधराय। पुष्कर वर्म शोभाकराय। पुष्यमी प्रियशेखराय। पुष्पकाधिप प्रियाय। पुष्परसाभिषिक्ताय। पुष्परसाभिषेक प्रियाय। पूष्णे। पूषमण्डलवासिने। पूषनेत्राय। पूषपूज्याय। प्रेष्यपोषकाय। प्रेष्यवृन्दस्तुताय। प्रेष्याप्सरः परिचारिताय। प्रेष्ठजनपालकाय नमः। ४३४०

प्रेषकाय नमः। पैष्टिकप्रियाय। पैष्टिकामोदशालिने। पैष्टिकतुष्टचित्ताय। प्रोषितभर्तृका प्रियप्रदाय। प्रोषितनायिका संस्तुताय। पौष्पक प्रीतियुक्ताय। पौष्पकानुरक्ताय। पौष प्रियाय। पौषोद्युक्ताय। पौषीचन्द्रिका धवलाय। पुष्कराय। पुष्करस्रजे। पुष्करनाल जन्मने। पुष्टाय। पुष्टि वर्धनाय। पुष्टिसंवर्धनाय। पुष्टानां पतये। पुष्टेशाय। पुष्टिप्रदाय नमः। ४३६०

पुष्पवस्तु स्वरूपाय नमः । पुष्पवद्वह्निनयनाय । पुष्पमालिने। पुष्पचाप विभंजकाय । पूषदंतांतकाय । पूषदंत विनाशाय। पूषदंतभिदे। पूषदन्तहृते। पृषदश्वाय। प्रसन्नेश्वराय। प्रसादशीलाय। प्रसाद सुमुखाय। प्रसादित निशाचराय। प्रसाद गोचरीकृत सुरसंघाय । प्रसवित्रे । प्रस्रवणाचलवासाय । प्रस्रवणप्रियाय। प्रसारिणीप्रायजटालताय। प्रसृतधृत विषभक्ष-काय। प्रसृतीकृत सागराय नमः। ४३८०

प्रसन्नहृदयाय नमः। प्रस्मृतीकृत भक्तापराधाय। प्रसाधित निजशरीराय । प्रसारित वश्यलोकाय । प्रसितजन शंकराय । प्रस्थित क्रोधाय । प्रस्तुताकाराय । प्रसोष्यन्तीपालकाय । प्रसूतिकराय । प्रसूतिजनकाय । प्रसूतरक्षणतत्पराय । प्रसूजनयितृरूपाय । प्रस्तोतृगीताय । पुस्तकालंकृतहस्ताय । प्रसृतकीर्तये। प्रसरप्रदाय। प्रसरशूराय। प्रसरनिरताय। प्रसर वृषभवाहाय। प्रसरशायिने। ४४००

प्रस्तरशय्याशायिने। प्रस्तरहारालंकृताय। प्रस्तरासीनाय। प्रस्तारकृते। प्रस्तार प्रवर्तकाय। प्रसारशीलाय। प्रसारिणे। प्रसारि मण्डलस्थाय। प्रस्तुतांकुराय। प्रसवजनकाय। प्रसव भूषिताय। प्रसेवकाय। प्रसूरूपाय। प्रास्ताविकस्तुतिस्तुताय। प्रासादवा-सनिरताय । प्रासाद्यायुधमण्डिताय । प्रास्तरिपुमण्डलाय। पांसुचन्दनाय। पांसुदिग्धाय। पांसुचन्दनभूषिताय नमः। ४४२०

प्रासंग्याय नमः । पांसुचामरलिप्तांगाय । पांसुचामर-प्रियाय। पांसुचामराय । पांसुलाय । पांसुलामदभंजनाय । पांसुलायुधाय। पांसुलावरदाय। पांसुलाभारहराय। पांसुलाचार-निर्धारिकाय । पांसुलागमहेतुवदनाय । पांसुधूसराय । पांसुकासीनप्रियाय । पुस्तकालंकृतशोभाय । पुस्तकाभय-

वरदहस्ताय । पुंसवनप्रियाय । पुंस्कोकिलकूजितलोलुपाय । पुंसां मोहनरूपाय । पौस्नसमर्चिताय । पौस्नरूपाय नमः । ४४४०

पौस्नाभीष्टदायिने नमः । पांसव्याय । प्रसन्नवदनाय । प्रसन्नाननाय । प्रसन्नास्याय । प्रसादाभिमुखाय । प्रसादाय । प्रसन्नात्मने । प्रसन्नाय । प्रसिद्धाय । प्रसन्नचित्ताय । प्रसवाय । प्रसृताय । प्रस्थिताय । पुंसे । प्रस्कन्दनाय । प्रहरणानां वज्राय । प्रहतप्राशिताय । प्रहिताय । प्रहृष्टाय नमः । ४४६०

प्रहृष्टकगणसेविताय नमः । प्रहेलिकाविदग्धाय । प्रहतवैरिणे । प्रहृतरिपुमण्डलाय । प्रहर्षकाय । प्रहरणभूषणाय । प्रहरणरूपिणे । प्रहरणदेवतास्तुताय । प्रहर्त्रे । प्रहन्त्रे । प्रहेतिवन्द्याय । प्रलयानलकृते । प्रलयानलनाशकाय । प्रलयार्णवसंस्थाय । प्रलयोत्पत्तिहेतवे । प्रलयदग्धसुरासुरमानवाय । पक्षिणीचन्द्रिकाभाय । पक्षीन्द्रवाहनेड्याय । पक्षीशाय । पक्षीश्वरपूजिताय नमः । ४४८०

प्लक्षद्वीपनिवासिने नमः । प्लक्षेश्वराय । प्रक्षिप्तपातकाय । प्रेक्षावदग्रेसराय । प्रेक्षावत्पूजिताय । प्रेक्षादत्तभुवनाधिपत्याय । प्रेक्षणलब्धनाकेन्द्रपूजिताय । प्रेक्षाधाम्ने । प्रक्षीणदोषाय । पक्षाय । पक्षमासार्धमासाय । पक्षमासदिनात्मने । पक्षधारिणे । पक्षरूपाय । पक्षिणे । पक्षीन्द्रवाहनाय नमः । ४४९६

फकारस्य वासुदेवो देवता । धनधान्यपशुप्रदाने विनियोगः ।

फ्रेंकाराय नमः । फट्काराय । फडस्त्रजपसंतुष्टाय । फणीन्द्रकुण्डलाय नमः । ४५००

फणिनाथाय नमः । फणिपूजिताय । फणिविद्यामयाय । फणीन्द्रोक्तमहिम्ने । फणीन्द्रांगदधारिणे । फणीन्द्रवरदाय ।

फणिराजचूडाय । फणिराजविभूषणाय । फणिपतिवेष्टित-शोभितलिङ्गाय । फणाधरेन्द्रधारिणे । फणीन्द्रसंवीततनवे । फणीन्द्रमेखलाय । फणिदामविराजिताय । फणामणि-विराजिताय । फेन्याय । फूत्कृताय । फ्रेंफ्रें नमः । फ्रेंपरायणाय । फ्रेंफ्रेंशब्दपरायणाय । फ्रेंबीजजपसंतुष्टाय नमः । ४५२०

फलाय नमः । फलदाय । फलज्ञाय । फलांकाय । फलरूपिणे । फाले भस्मरेखात्रयान्विताय । फालाक्षिजातज्वलनलेलिहान-मनोभवाय । फालाक्षाय । फालाक्षिप्रभवप्रभंजनसखप्रोद्यत्स्फु-लिङ्गच्छटातूलानङ्गकाय । फालचन्द्राय । फालेक्षणानल-विशोषितपञ्चबाणाय । फालेक्षणाय । फाललोचनजातपावक-दग्धमन्मथविग्रहाय । फालनेत्राय । फुल्लपद्मविशालाक्षाय । फं वामकर्णांगुलिकाय नमः । ४५३६

बकारस्य अश्विनौ देवता । वातपित्तादिनाशने विनियोगः ।

बीजाय नमः । बीजमध्यस्थिताय । बीजतोषिताय । बीजमुद्रास्वरूपिणे नमः । ४५४०

बीजवाहनाय नमः । बीजेशाय । बीजाधारकरूपाय । बीजाध्यक्षाय । बीजकर्त्रे । बीजतन्त्राय । बीजनाशकाय । बीजयन्त्रस्थिताय । बीजराजाय । बीजहेतवे । बीजवर्णस्वरूपाय । बीजदाय । बीजमात्राय । बीजवृद्धिदाय । बीजधराय । बीजासनसंस्थिताङ्गाय । बीजरूपाय । बीजपाराय । बीजसंस्थमरीचये । बीजकोशाय नमः । ४५६०

बीजिने नमः । बीजवृक्षस्वरूपिणे । बीजहन्त्रे । बीजक्षेत्राधिपाय । बडवामुखाय । बडबाग्नये । बिडौजोविधि-वैकुण्ठनमिताय । बाणपूजिताय । बाणपूजारताय । बाणहस्ताय ।

बाणप्रियाय। बाणीकृतेन्द्वग्निनारायणतीक्ष्णेषवे। बादिहस्ताय। बृंदारकवरार्चिताय । बृंदावनकृतालयाय । बिन्दवे । बिंदुनादात्मकाय। बन्धनाय। बन्धकर्त्रे। बन्धवर्जिताय नमः। ४५८०

बन्धवे नमः । बन्धाय । बुद्धये । बुद्धाय । बुध्नियाय । बुद्धिमद्वराय । बुद्धीन्द्रियात्मने । बुद्धीशाय । बुद्धिप्रेरकाय । बुद्धिदाय। बुद्धिरूपाय। बुद्धिविवर्धनकारणलिङ्गाय। बुधात्मने। बोध्रे । बोध्याय । बोद्धव्याय । बोधिने । बोधित्रे । बोधनाय । बोधरूपिणे नमः। ४६००

बोध्यरूपाय नमः । ब्लूं । ब्लूं ब्लूं बं परमशिवाय । बिम्बागममुखाय । बभ्रवे । बब्लुशाय । बाभ्राशब्दपरायणाय । बिभ्राणाय । बलाय । बलशालिने । बलघ्ने । बलचारिणे । बलरूपधृते। बलकृते । बलविदे । बलप्रमथनाय । बलाबल-समूहाय। बलवतां वायवे। बलिने नमः। ४६२०

बलिभुजे नमः। बलिगतये। बलीवर्दाय। बलोन्माथिने। बलवते। बलिवीराय। बालाय। बालरूपाय। बालरूपधराय। बालमतये । बालेश्वराय । बालभावभृते । बालप्रियाय । बालचन्द्रप्रियाय । बालचन्द्रावतंसाय । बालादित्यसहस्र-कोटिसदृशाय। बालावर्ण्यैकवित्वभूमिसुखदाय। बालार्कमण्ड-लाकाराय। बिल्वदलाकाराय। बिल्वप्रियाय नमः। ४६४०

बिल्ववृक्षसमाश्रयाय नमः । बिल्वाय । बिल्मिने । बिल्वमालाधराय । बैल्वाय । बहिर्मुखाय । बहिर्मुखमहा-दर्पदमनाय। बहुश्रुताय। बहुप्रदाय। बहुमयाय। बहुरूपाय। बहुभूताय। बहुधराय। बहुरूपधृते। बहुरश्मये। बहुप्रसादाय। बहुधानिन्दिताय। बहुमालाय। बहुलाय। बहुकर्कशाय नमः। ४६६०

बहुरूपिणे नमः । बहुविधपरितोषबाष्पपूरस्फुट-पुलकांकितचारुभोगभूमये । बहुनेत्राय । बाहुभ्यां । बृहस्पतये । बृहस्पत्यवमत्यासशक्रभीहारिणे । बृहद्गर्भाय । बृहज्ज्योतिषे । बृहते । बृहद्रथाय । बृहत्कीर्तये । ब्रह्मात्मकपादाय । ब्रह्मात्मकपश्चिमवदनाय । ब्रह्मरूपिणे । ब्रह्मचारिणे । ब्रह्मदारकाय । ब्रह्मात्मने । ब्रह्मसदनाय । ब्रह्मांडभेदनाय । ब्रह्मज्ञानिने नमः । ४६८०

ब्रह्मद्रुहे नमः । ब्रह्मचक्राय । ब्रह्मगर्भाय । ब्रह्मणे । ब्रह्मण्याय । ब्रह्मदण्डविनिर्मात्रे । ब्रह्मकृते । ब्रह्मांगहृते । ब्रह्मविदे । ब्रह्मलोकाय । ब्रह्मवर्चसाय । ब्रह्मांडनायकाय । ब्रह्मज्योतिषे । ब्रह्मानंदात्मने । ब्रह्मशिरच्छेत्रे । ब्रह्ममयाय । ब्रह्मयोनये । ब्रह्मचक्रभ्रमाय । ब्रह्मानंदाय । ब्रह्मांडरूपाय नमः । ४७००

ब्रह्मरूपाय नमः । ब्रह्मांडरूपिणे । ब्रह्माधिपतये । ब्रह्मलिङ्गाय । ब्रह्मादिप्रभवे । ब्रह्मविद्याधिपतये । ब्रह्मविद्याप्रदायिने । ब्रह्मण्यदेवाय । ब्रह्मचारिणां शरण्याय । ब्रह्मणोऽधिपतये । ब्रह्मणः प्रियाय । ब्रह्मात्मैक्यस्वरूपिणे । ब्रह्मतनवे । ब्रह्मविदां ब्रह्मणे । ब्रह्मशिरोहंत्रे । ब्रह्मिष्ठाय । ब्रह्मज्योतिःस्वरूपाय । ब्रह्मस्वरूपाय । ब्रह्मभावनतत्पराय । ब्रह्मबीजाय नमः । ४७२०

ब्रह्मनारायणेशानाद्यखिलाकृतये नमः । ब्रह्ममुरारि-सुरार्चितलिङ्गाय । ब्रह्मरुद्राद्यवताराय । ब्रह्मणां गणपतये । ब्रह्मादिभिर्वन्द्यमानाय । ब्रह्मादिभिर्वन्द्यमानपदांबुजाय । ब्रह्मवादिनां ब्रह्मणे । ब्रह्मादिभिरनुध्येयाय । ब्रह्मणस्पतये । ब्रह्मयोनये । ब्रह्मवेद्याय । ब्रह्मस्थाय । ब्रह्मविद्ध्येयाय । ब्रह्मवर्जिताय । ब्रह्मांडसाक्षिणे । ब्रह्मतत्त्वाय ।

ब्रह्मास्त्रार्थस्वरूपाय । ब्रह्मदण्डस्वरूपिणे । ब्रह्मणि स्थिताय । ब्रह्मवन्दनीयाय नमः । ४७४०

ब्राह्मणत्वेन विश्रुताय नमः । ब्राह्मणाय । ब्राह्मणप्रियाय । ब्राह्मणपालकाय । ब्राह्मणविदे । ब्राह्मणानुगताय नमः । ४७४६

भकारस्य शुक्रो देवता । भूतप्रेतभयापनयने विनियोगः ।

भकाररूपाय नमः । भक्तवत्सलाय । भक्तहृद्वनजभृंगाय । भक्तपालाय । भक्तचकोरचन्द्राय । भक्तसेव्याय । भक्तजीवनाय । भक्तमंदाराय । भक्तहृत्पद्मनिलयाय । भक्तभयच्छेदकारणाय । भक्तविशेषवशीकराय । भक्तकल्याणदाय । भक्तवरदाय । भक्तगम्याय नमः । ४७६०

भक्तकामदुघे नमः । भक्तप्रार्थितसर्वार्थकामधेनवे । भक्तकल्पतरवे । भक्तकृपापराय । भक्तमानसमन्दिराय । भक्तप्रियाय । भक्तचित्तापहारकाय । भक्तवश्याय । भक्तरक्षकवामाक्षिकटाक्षाय । भक्तपोषकाय । भक्तचैतन्यनिलयाय । भक्तानुग्रहमूर्तये । भक्तारविन्दहेलये । भक्तानुग्रहविग्रहाय । भक्ताभिमतप्रदाय । भक्तानुरक्ताय । भक्तानामिष्टकामफलप्रदाय । भक्तानुग्रहकातराय । भक्तानामभयप्रदाय । भक्तानुग्रहकारकाय नमः । ४७८०

भक्तानां भयभंजनाय नमः । भक्तानां सुलभाय । भक्तानां भुक्तिमुक्तिप्रदाय । भक्तार्तिभंजनपराय । भक्तानां शर्मदाय । भक्तानुकंपिने । भक्तानां भीतिभंगरताय । भक्तार्तिभंजनाय भक्ताभीप्सितदायकाय । भक्तानामिष्टदायिने । भक्तानामार्तिनाशाय । भक्तिदाय । भक्तिमुक्तिकारणाय । भक्तिमते । भक्तिप्रदाय । भक्तिनायकाय । भक्तिगम्याय । भक्तेष्टदात्रे । भक्तेच्छोपात्तविग्रहाय । भुक्तिमुक्तिफलप्रदाय नमः । ४८००

भुक्तिमुक्तिदायकाय नमः । भ्वाकृतये । भोक्त्रे । भोक्तृरूपाय। भगवते । भगपूजापरायणाय । भगनेत्रभिदे । भगहारिणे । भगपतये। भगनेत्रांतकाय । भगप्रमथनाय । भगनेत्रविदारणाय । भगघ्नाय । भगनेत्रहारिणे । भगधारिणे । भगात्मने । भगाय । भगाक्षहराय । भगाक्षसंस्फोटनदक्षकर्मणे । भगाक्षघ्ने नमः । ४८२०

भगनेत्रहंत्रे नमः । भगीरथसमर्चिताय । भाग्याय । भाग्यप्रदाय । भाग्यारोग्यप्रदायकाय । भाग्यदात्रे । भागधराय । भागिने । भागीरथीप्रियाय । भूगर्भाय । भोगिशयनाय । भोगिभूषाय । भोगदाय । भोगिने । भोगनायकाय । भोगभुजे । भोग्याय । भोगिभूषणभूषिताय । भोगमार्गप्रदाय । भोगमोक्षप्रदाय नमः । ४८४०

भागिकुण्डलमण्डिताय नमः । भोगभृता वलयवते । भङ्गुराय। भृङ्गिरिटये । भृङ्गिरिटिसेव्यपदांबुजाय । भूचराय । भजमानाय । भ्राजमानाय । भ्राजिष्णवे । भुजङ्गकुण्डलिने । भुजगेन्द्रलसत्कण्ठाय। भुजङ्गाभरणप्रियाय । भुजङ्गविलसत्कर्णाय। भुजङ्गवलयावृताय। भुजङ्गराजविलसत्कङ्कणाय। भुजङ्गहारवलयाय । भुजङ्गहाराय । भुजङ्गवल्लीवलयस्रङ्नद्धजूटाय। भुजङ्गविभूषणाय। भुजगाधिपकङ्कणाय नमः । ४८६०

भुजगलोकपतये नमः । भुजगहारमुदन्विताय । भुजगभूषणभूषिताय । भुजङ्गराजकुण्डलाय । भुजङ्गराजमालया निबद्धजाटजूटकाय । भुजङ्गशिशुवित्रस्तकुरंगशिशुमण्डिताय । भुजभ्रान्तदिगंताय । भोजनाय । भोजयित्रे । भोज्याय । भोजसन्निभाय । भज्यमानविपद्द्रुमाय । भट्टाराय । भट्टारकाय । भण्डासुरविध्वंसनोत्सुकाय । भिण्डिवालभुसुंडिभृते । भ्रूणहत्यापातकनाशनाय। भ्रात्रे। भ्रान्ताय। भ्रान्तिरहिताय नमः । ४८८०

भ्रान्तिनाशनाय नमः । भीतिनाशनाय । भीतव्रातपरित्रात्रे । भीताभीतभयापहाय । भीतिभरसूदनाय । भूतसंसारदुर्गाय । भूतसंघनायकाय । भूतवेतालसंघाढ्याय । भूतवेतालजुष्टाय । भूतभर्त्रे । भूतानां पतये । भूतिभूषाय । भूतभव्यभवते । भूतिभासितोरसे । भूतिकर्पूरसंयुक्तदिव्याङ्गाय । भूतेशाय । भूतसंघसमावृताय । भूतये । भूतिमतां श्रेष्ठाय । भूतिनायकाय नमः । ४९००

भूतेश्वराय नमः । भूतयोनये । भूतसंघार्चिताय । भूताध्यक्षाय । भूतपतये । भूताय । भूतनिवारणाय । भूतवाहनसारथये । भूतचारिणे । भूतभावनाय । भूतिभूषणाय । भूतिदाय । भूतिदायकाय । भूतिकृते । भूतिप्रियाय । भूतिभूषिताय । भूतिभूषणभूषिताय । भूतिलिङ्गाय । भूतिवाहनाय । भूतिभूतये नमः । ४९२०

भूतभव्यभवाश्रयाय नमः । भूतग्रामशरीरिणे । भूतभव्यभविष्याय । भूतभव्येशाय । भूतभव्यभवोद्भवाय । भूतपरिवृताय । भूतवेतालसेविताय । भूतभृते । भूतकृते । भूतमित्राय । भूतवृताय । भूतगणसेव्याय । भूतगाय । भूतघ्ने । भूतमूर्तये । भूतभव्यभवन्नाथाय । भूतवाहनाय । भूतकायस्थाय । भूतपावनाय । भूतनिषेविताय नमः । ४९४०

भूतसंघाधिनाथाय नमः । भूतालयाय । भूतावासाय । भूत्यालेपनभूषिताय । भूतानां प्रभवे । भूतात्मने । भूतानां पतये । भूताधिपतये । भूतानां व्योम्ने । भूतादये । भूतानां शुभदाय । भूतव्रातपरित्रात्रे । भीताभीतभयापहाराय । भूतनाशनाय । भद्रपीठकृतावासाय । भद्रकालीप्रियंकराय । भद्रदाय । भद्रनादप्रियाय । भद्रवाहनाय । भद्राय नमः । ४९६०

भद्राकराय नमः । भूदारमूर्तिपरिमृग्यपदांबुजाय । भेदत्रयरहिताय । भेदवते । भूधरायुधाय । भूधरस्थिताय । भानवे । भानुभूषाय । भानुरूपाय । भानुसोमाग्निहेतवे । भानुसोमाग्नि-नेत्राय । भानुकोटिप्रतीकाशाय । भानुप्रियाय । भानुदर्पहराय । भ्वप्तेजोवाय्वाकाशतुरीयाय । भूपतये । भूपतित्त्वप्रदाय । भूपाय । भ्रांबीजजपसंतुष्टाय । भाभीशब्दपरायणाय नमः । ४९८०

भूभारोत्तारणाय नमः । भुंभारवप्रियाय । भूभृदाश्रयाय । भीभत्साय । भ्रमरांबाप्रपूजिताय । भ्रमराम्बानायकाय । भ्रामरीयुक्ताय । भ्रमरिणे । भामाशंकराय । भंमृगयवे । भीमाय । भीमपराक्रमाय । भीमगर्भाय । भीमसङ्गमलोलुपाय । भीमभूषाय । भीमसंग्रामलोलुपाय । भीमचन्द्रपतये । भीमवेषाय । भीमनिस्वनाय । भीमवर्मणे नमः । ५०००

भीमकर्मणे नमः । भीमघण्टाकराय । भीमलिङ्गाय । भीमगुणानुगाय । भीमरूपाय । भीमाख्यद्विजबंधूरुभव-भीतिभिदे । भीमाट्टहासवक्त्राय । भूमिजार्चिताय । भूमिदाय । भूमिभारार्तिसंहर्त्रे । भूम्ने । भ्रूमध्ये स्थिताय । भौमाय । भौमेशाय । भयहारिणे । भयवर्जिताय । भयंकराय । भयापहाय । भयानकाय । भूयसे नमः । ५०२०

भरद्वाजदीक्षागुरुभूतदक्षिणवदनाय नमः । भरद्वाजाय । भरद्वाजसमाश्रिताय । भरताय । भराय । भर्गदेवाय । भर्गवासाय । भर्गाय । भर्त्रे । भारतीप्रियाय । भारद्वाजकुलीनात्मपूजकाय । भार्गवाय । भार्यासुतयुक्ताय । भूर्भुवःस्वःपतये । भूर्भुवो लक्ष्म्यै । भूर्देवाय । भेरुण्डाय । भैरवाय । भैरवाष्टकसंसेव्याय । भैरवनादनादिने नमः । ५०४०

भैरववेगवेगाय नमः । भैरवनाथाय । भैरवरूपाय । भैरवरूपिणे । भैरवानन्दरूपाय । भालनेत्रानलार्चिःपीनोष्मणे । भालनेत्राग्निसंदग्धमन्मथाय । भूलोकवासिने । भूलोकनिवासिजनसेविताय । भूलोकशिवलोकेशाय । भूलोकामरपादपाय । भवरोगभयध्वंसिने । भववैद्याय । भवभयापहाय । भवविदूराय । भवहेतवे । भव्यसौख्यदायिने । भवभावनाय । भव्यविग्रहाय । भवनाशाय नमः । ५०६०

भवघ्नाय नमः । भवभीतिहराय । भवते । भवहारिणे । भव्येशाय । भवहेतवे । भवच्छिदे । भवकृन्तनाय । भवोद्भवाय । भवसागरतारणाय । भवरोगभयापहाय । भवसंहर्त्रे । भवरोगिणां भेषजाय । भवद्द्रव्यभूतेश्वराय । भवसिन्धुप्लवाय । भवाभिभूतभीतिभङ्गिने । भवारये । भव्याय । भवानीपतये । भवाब्धितारकाय नमः । ५०८०

भवानीकलत्राय नमः । भवान्तकाय । भवानीसमन्विताय । भवाय । भवानीप्रीतिदाय । भवानीजपसंतुष्टाय । भवानीपूजनोत्सुकाय । भवात्मने । भवार्तिघ्ने । भवाब्धितरणोपायाय । भवातीताय । भवानीशाय । भवारण्यकुठारकाय । भवान्धकारदीपाय । भावलिङ्गाय । भावार्थगोचराय । भावाय । भावाभावविवर्जिताय । भावरताय । भावप्रियाय नमः । ५१००

भावातीताय नमः । भुवनेश्वराय । भुवन्तये । भुवनेशाय । भुवनाध्वरोम्णे । भुवनत्रयमण्डिताय । भुवनत्रितयाधिपाय । भुवनैकनाथाय । भुवनत्रयकारणाय । भुवनाधीश्वराय । भुवनाय । भुवनेश्वराय । भूशयाय । भाषापतिस्तुताय । भाष्यकारमंजीराय । भिषजां भिषक्तमाय । भिषक्तमाय । भिषजे । भीषणाय । भीष्माय नमः । ५१२०

भूषणाय नमः । भूषास्थिकुण्डप्रकरपरिवृताय । भूषणभूषिताय। भेषजाय । भस्मभूषाय । भस्मनिष्ठमहाशैवस्वात्मभूताय । भस्मभूषितविग्रहाय । भस्मप्रियाय। भस्मभासितसर्वांगाय । भस्मसंस्थाय । भस्मशायिने। भस्मशुद्धिकराय। भस्मगोप्त्रे । भसितश्वेतवरांगाय। भस्मभूताय। भसितलसिताय । भस्मदिग्धकलेवराय । भस्मधारणहृष्टाय । भस्मकैलासदाय। भस्मलेपकराय नमः। ५१४०

भस्मदिग्धशरीराय नमः । भस्मविभूषिताङ्गाय । भस्मभूषाधराय । भस्मना भूषितांगाय । भस्मरुद्राक्षमालाभिर्मनोहरकलेवराय । भस्मगौराङ्गाय । भस्मलेपाय । भस्मीकृतानङ्गाय । भसितालेपमण्डिताय । भसितभूषाय । भस्मोद्धूलितसर्वांगाय । भस्मोद्धूलितविग्रहाय । भस्मासुरप्रियाय। भस्मासक्ताय। भस्मासुरेष्टदाय। भस्माङ्गधारिणे। भस्मशयाय। भस्माङ्गरागाय। भासयते। भासुराङ्गाय नमः। ५१६०

भास्वद्बालमृणालकोमलावयवाय नमः । भास्वराय । भास्वत्कटाक्षाय। भासकानां भासकाय। भास्वते। भास्कराय। भास्कराराध्याय । भूसुराराधनप्रीताय । भूसुराध्यक्षाय । भूसुरेष्टफलप्रदाय। भूसुरेड्याय। भूसुतापालनाय। भूसुरेशाय। भूसुरवन्दिताय। भिक्षाहाराय। भिक्षाचरणतत्पराय। भिक्षवे। भिक्षुरूपाय । भिक्षुदूषकाय । भिक्षायाचनपरायणाय नमः । ५१८०

भिक्षाटनवेषाय नमः । भिक्षुकाय । भैक्षकर्मपरायणाय । भैक्ष्यनाशकाय। भैक्षचराय नमः। ५१८५

मकारस्य कालरुद्रो देवता। स्तंभनद्वेषणमोहनेषु विनियोगः।

मकाररूपाय नमः । मकाराय । मकुटागममकुटाय । मकरंदरसासारवचनाय । मकुटाङ्गदकेयूरकङ्कणादिपरिष्कृताय । मकारार्थाय । मुक्तिरूपाय । मुक्तीशाय । मुक्तिप्रदात्रे । मुक्तामणिविराजिताय । मुकुन्दाय । मुकुन्दसखाय । मुक्ततेजसे । मुक्तये । मुक्तादामपरीताङ्गाय नमः । ५२००

विश्वरूपिणे नमः। विश्वाशापरिपूरकाय। विश्वगर्भाय। विशृंखलाय। विश्वामित्राय। विशल्याय। विश्वमोहनाय। विशदाङ्गाय। विश्वधुरंधराय। विश्वेशाय। विश्वंभराय। विश्वनिर्माणकारिणे। विशिष्टाय। विशोकाय। विशेषितगुणात्म-काय। विशाखाय। विशालाय। विश्वामरेशाय। विश्रान्ताय। विश्वामित्रप्रसादिने नमः। ७८००

विश्वावासाय नमः। विशांपतये। विशालाक्षाय। विशालपद्मपत्राभाय। विशालवक्षसे। विशालवक्षोविलसच्चारु-हासाय। वैश्रवणाय। वैश्वानराय। वैश्वदेवप्रियाय। विश्वंभरसमाराध्याय। विश्वभरणकारणाय। वषट्काराय।

विश्वनायकाय। वषट्कारप्रियाय। विश्ववासिने। वषडाकाराय। विश्वस्थाय । विष्णुवल्लभाय । विष्णुरूपविनोदिने । विष्णुब्रह्मादिवंद्याय नमः। ७८२०

विष्णुवंद्याय नमः । विष्णुप्रियाय । विष्णुनेत्रे । विष्णुमायाविलासिने। विष्णुगर्वहराय। विष्णुसंकल्पकारकाय। विष्णुरूपिणे। विष्णवे। विष्णुचैतन्यनिलयाय। विष्णुप्राणेश्वराय। विष्णुकलत्राय । विष्णुक्षेत्राय । विष्णुकोट्यर्चितांघ्रये । विष्णुमायात्मकारिणे। विष्णुप्रसादकाय। विष्णुकंधरपातनाय। विष्णुमूर्तये। विष्णुलक्ष्यस्वरूपिणे। विष्ण्वात्मकोत्तरवदनाय। विष्ण्वात्मकगुह्याय नमः। ७८४०

विषाहारिणे नमः । विषहर्यादिचतुर्मूर्तिप्रतिपादकपश्चिमवदनाय। विषभंजनाय। विषघ्नाय। विषमाय। विषधराय। विषमदृष्टये । विषहारिणे । विषण्णांगाय । विषमेक्षणाय । विषमनेत्राय । विषरोगादिभंजनाय। विषयार्णवमग्नानां समुद्धरणहेतवे। विष्टंभाय। विषभक्षणतत्पराय। विष्वक्सेनाय। विष्वक्सेनकृतस्तोत्राय । विष्टरश्रवसे । विष्फाराय । वृषेन्द्राय नमः। ७८६०

वृषभेश्वराय नमः। वृषध्वजाय। वृषात्मने। वृषभाधीशाय। वृषारूढाय। वृषणाय। वृषपर्वणे। वृषरूपाय। वृषवर्धनाय। वृषांकाय । वृषदश्वाय । वृषज्ञेयाय । वृषभाय । वृषकर्मणे । वृषनिधये । वृषप्रवर्तकाय । वृषस्थापकाय । वृषभाक्षाय । वृषप्रियाय। वृषनाभाय नमः। ७८८०

वृषदर्भाय नमः। वृषशृंगाय। वृषर्षभाय। वृषभोदराय। वृषभेक्षणाय । वृषशराय । वृषभूताय । वृषभाधिरूढाय । वृषवाहनाय। वृषगमनाय। वृषभस्थाय। वृषाकृतये। वृषाकपये।

वृषाहिने। वृषोदराय। वृषाधाराय। वृषायुधाय। वृषभवाहनाय। वृषभतुरंगाय । वेष्टकप्रणवान्तोदितनादस्याधः- पीठमध्योपक्रमादिविलसद्बिकारादिनादान्तात्मने नमः। ७९००

वैष्कर्म्याय नमः। वसवे। वसुमनसे। वसुमते। वसुश्रवसे। वसुश्वासाय । वसुरेतसे । वसुरत्नपरिच्छदाय । वसुप्रियाय । वसुधास्तुताय। वसुदाय। वसुंधराय। वसुश्रेष्ठाय। वसुत्रात्रे। वसुदेवाय। वसुजन्मविमोचिने। वसुप्रदाय। वसुधायासहरणाय। वसुंधरामहाभारसूदनाय। वसूनां पावनाय नमः। ७९२०

वसूनां पतये नमः। वसिष्ठादिमुनीन्द्रार्चिताय। वसिष्ठाय। वसिष्ठवामदेवादिवंद्याय। वसंताय। वस्तुरूपाय। वसंतऋतवे। वस्वयनाय । वस्वात्मकाय । वासवयागविदे । वसंतेशाय । वासववंद्याय। वासवादिस्तुताय। वसंतदाय। वासवाभीष्टदाय। वासवाय। वासवपूजिताय। वासुदेवाय। वासुदेव मनोहराय। वासुकीज्याय नमः। ७९४०

वासवार्चितपादश्रिये नमः । वासुकिभूषणाय । वासवारिविनाशिने। वासुदेवप्रियाय। वासुदेवैकवेद्यांघ्रिवैभवाय। वासुक्याद्रिमहासर्पालंकृताय। वासुकीकंठभूषणाय। वासुकितक्षकलसत्कुण्डलाय । वासुकीशाय । वासुकिश्वासवासितभासितोरसे। वासुकिकंकणाय। वास्तव्याय। वासुदेवसहायाय। वास्तुपाय । वासुदेवार्चितस्वांघ्रिपंकेरुहाय । वास्तेयभूतनिगमन्यग्रोधाय । वास्तवार्थविजिज्ञासुनेदिष्ठाय । वासवादिसुरश्रेष्ठवंदिताय। वासवेश्वराय। व्यासाय नमः। ७९६०

व्याससूत्रार्थगोचराय नमः। व्याससन्नुताय। व्यासमूर्तये। व्यासमौनिस्तुताय। व्यासादिमौनीन्द्रमहिताय। विस्फुरिततेजसे। विसृजद्भ्यो। विस्ताराय। वाहनीभवदुक्षाय। वाहनीकृतवृषभाय।

वाह्निनीकृतधर्मराजाय। वह्निनेत्राय। वह्निप्रभाय। वह्निमूर्तये। वह्निमंडलमध्यगाय। वह्निसोमार्करूपाय। वह्निलिंगाय। वह्निदर्पविघातकाय। वह्न्यात्मने। वह्नितेजसे नमः। ७९८०

वह्निरेतसे नमः। वह्नये। वह्न्यर्कलिंगाय। वह्निसोमार्क-लिंगाय। विह्वलाय। विहंगाय। व्यूहाय। विहायसगतये। व्यूहेशाय। वळक्षाय। वळक्षद्युतिशेखराय। वळक्षवृषभारूढाय। वळक्षभूतिभूषिताय। वळित्रयविराजिताय। व्यळीकनिरासकाय। व्याळिने। व्याळरूपाय। व्याळभूषणाय। व्याळयज्ञसूत्राय। व्याळदंष्ट्रिलसद्धाराय नमः। ८०००

व्याळाचलनिवासिने नमः। व्याळाकल्पाय। व्याळादि-वाहनजनकाय। वाक्षरदक्षिणपादाय। वृक्षाणां प्रभवे। वृक्षैरावृतकायाय। वृक्षाणां पतये। वृक्षेशाय। वृक्षकेतवे। विक्षीणकेभ्यो नमः। विक्षराय नमः। ८०११

शवर्णस्य शिवो देवता। मोक्षार्थे विनियोगः।

शकुनिविभुध्वजसन्नुताय नमः। शक्ताय। शकुन्त-वाहनशराय। शक्तये। शक्ररूपाय। शक्तिपूज्याय। शक्ति-बीजात्मकाय। शक्तिदाय। शक्तिमार्गपरायणाय नमः। ८०२०

शक्तित्रयफलदाय नमः। शक्तिनाथाय। शक्तियुजे। शक्रवृष्टिप्रशमनोन्मुखाय। शक्रामर्षकराय। शक्राभिवन्दिताय। शक्तिमतां श्रेष्ठाय। शक्तिमदात्मने। शक्तिधारणाय। शाकल्याय। शाक्यनाथाख्यपाषंडपूजिताश्मभृते। शाक्ता-श्रमगताय। शांकरीकलत्राय। शांकरीहृदयेशाय। शिकाररूपाय। श्रीकराय। श्रीकेलये। श्रीकण्ठाय। श्रीकराकाराय। श्रीकंठनाथाय नमः। ८०४०

श्रीकारसुधाब्धिशीतरुचये नमः । श्रीकांतकांतनयनार्चित-पादपद्माय । श्रीकालहस्तिलिङ्गाख्याभरणाय । शुक्राय । शुक्ररूपाय । शुक्रशोचिषे । शुक्रपूज्याय । शुक्रभोगिने । शुक्रमदहृते । शुक्रभक्षणतत्पराय । शुक्लाय । शुक्लयज्ञोपवीतिने । शुक्लवस्त्रपरीधानाय । शुक्लमाल्यांबरधराय । शुक्लज्योतिषे । शुक्लभस्मावलिप्ताय । शुक्लांबरधराय । शुक्लकर्मरताय । शुक्लतनवे । शूकाराय नमः । ८०६०

शूकृताय नमः । श्लोक्याय । श्लोकाय । शोकहराय । शोकघ्ने । शोकनाशनाय । शंकराय । शंकानिरोधकाय । शंकुकर्णाय । शिखावते । शिखाग्रनिलयाय । शिखिने । शिखंडिने । शिखिवाहनजन्मभुवे । शिखरिकेतनाय । शिखरीश्वराय । शिखरीन्द्रधनुःशोभिकराब्जाय । शिखंडिवाहनोदीर्णवात्सल्याय । शिखराय । शिखिसारथये नमः । ८०८०

शंखाय नमः । शंखप्रभाय । शंखपादाय । शंखप्रियाय । शंखिने । शंखशूलधराय । शंगाय । श्रीगिरिमल्लिकार्जुन-महालिंगाय । शृङ्गारिणे । शृङ्गाररससमुल्लसदंगविलासाय । शृङ्गिणे । शृङ्गप्रियाय । श्रीगर्भाय । श्रीघनाय । शीघ्रियाय । शीघ्रगाय । शीघ्रकारिणे । शीघ्रमिष्टफलदाय । शचीपतिस्तुताय । शचीशाभीष्टदायकाय नमः । ८१००

श्रीचन्द्रचूडाय नमः । शुचिप्रियाय । शुचये । शुचिस्मिताय । शुचिवर्णाय । शुचिश्रवसे । शिंजानमणिमंजीरचरणाय । शिंजिनीभूतभुजगनायकाय । शिंजिनीकृतपन्नगेश्वराय । शिंजिनीकृतवासुकये । शौंडाय । शौंडीर्यमंडिताय । शोणांभोजसमाननाय । शोणवर्णजटाजूटाय । शतजिह्वाय । शतवेलाद्यायुधाय । शतघ्नीपाशशक्तिमते । शतमूर्तये । शतधन्वने । शतपत्रायतेक्षणाय नमः । ८१२०

शतधृतये नमः । शतघ्न्यशनिखड्गिने । शताननाय । शतावर्ताय । शतरूपविरूपाय । शतकेतवे । शताकृतये । शतानंदाय । शत्रुजिते । शत्रुघ्नाय । शत्रुतापनाय । शत्रुनिषूदनाय । शांताय । शान्तस्वान्ताय । शान्तरूपाय । शान्तमानसभाविताय । शान्तरागाय । शान्तशरच्चन्द्रनिभाय । शान्तमानसाय । शान्तात्मने नमः । ८१४०

शान्तचित्ताम्बुजचञ्चरीकाय नमः । शान्तशक्तिसंशय-वर्जिताय । शान्तमूर्तये । शान्त्यै । शान्तिकलात्मकललाटादिकाय । शान्त्यतीतात्मकमूर्धादिकाय । शान्तात्मरूपिणे । शान्तिवर्धनाय । शान्त्यतीताय । शान्तिदाय । शान्तिस्वरूपिणे । श्रित-विबुधलोकाय । शितिकंठाय । शितिकंठोर्ध्वरेतसे । शीतलशीलाय । शीतांशुमित्रदहननयनाय । शीतांशुशोभितकिरीटविराजमानाय । श्रुत्यै । श्रुतिपादाय । श्रुतिशिरःस्थानांतराधिष्ठिताय नमः । ८१६०

श्रुतिसेव्याय नमः । श्रुताय । श्रुतिपदैर्वेद्याय । श्रुतिगीतकीर्तये । श्रुतिसाराय । श्रुतिपारगाय । श्रुतिज्ञानगम्याय । श्रुतिमते । श्रुतज्ञाय । श्रुतये । श्रुतिचूडामणयेऽपि चन्द्रचूडामणये । श्रुतिप्रकाशाय । श्रुतिमार्गेशाय । श्रुतिसागराय । श्रुतिचक्षुषे । श्रुतिलिङ्गाय । श्रुतिप्रणवगम्याय । श्वेतपिङ्गलाय । श्वेतरक्षापराय । श्वेताय नमः । ८१८०

श्वेतांबरधराय नमः । श्वेतमाल्यविभूषणाय । श्वेतद्वीपाय । श्वेतातपत्ररुचिराय । श्वेतचामरवीजिताय । श्वेताश्वाय । श्वेतवाहनसख्यवते । श्वेतलोहिताय । श्रोत्रे । श्रोतृवर्गरसायनाय । श्रोतव्याय । शिथिलीकृतसंसारबंधनाय । शंदक्षिणपादनूपुराय । श्रीदाय । श्रीधराय । शुद्धविग्रहाय । शुद्धकेवलमिश्रादि-पूज्योपास्याय । शुद्धपाणये । शुद्धशासनाय । शुद्धगुणार्णवाय नमः । ८२००

शुद्धहृदयाय नमः । शुद्धस्फटिकनिर्मलाय । शुद्धांतरंगाय । शुद्धज्योतिःस्वरूपाय । शुद्धभावाय । शुद्धस्फटिकमालाढ्याय । शुद्धबुद्धये । शुद्धबोधप्रबुद्धाय । शुद्धमार्गप्रवर्तिने । शुद्धस्फटिकसंकाशमूर्तये । शुद्धज्ञानिने । शुद्धस्फटिकोज्ज्वल-विग्रहाय । शुद्धचैतन्याय । शुद्धाध्वजनन्यात्मने । शुद्धानंदाय । शुद्धाय । शनये । शनैश्चराय । श्रीनिकेतनाय । श्रीनीलकंठाय नमः । ८२२०

श्रीनिधये नमः । श्रीनारदपरिप्रश्नसंशयच्छेदिने । श्रीनाथादिस्वरूपिणे । श्रीनिवासाय । श्रीनाथाधीश्वराय । शुनासीराय । शून्याय । श्वपतिभ्यो । शापवर्जिताय । शापानुग्रहदाय । शिपिविष्टाय । श्रीपपूजिताय । श्रीपतये । श्रीप्रदाय । श्रीपतिवंद्यपादाय । श्रीपदाय । श्रीप्रदत्ताम्बुजस्रग्विणे । शब्दब्रह्मणे । शबरार्भकलालांबुस्तोकसेकजुषे । शब्दसहाय नमः । ८२४०

शब्दस्पर्शस्वरूपाय नमः । शब्दगोचराय । शब्दस्पर्श-रसगंधसाधकाय । शब्दपतये । शब्दातिगाय । शब्दब्रह्म-प्रतिष्ठिताय । शब्दातीताय । शब्दात्मकाय । शब्दब्रह्मैकपारगाय । शिबिकास्यादिदायकाय । शंबरारिनिकृन्तनाय । शंबरान्तकवैरिणे । शंबराय । श्रीबीजजपसंतुष्टाय । शुभाय । शुभावहाय । शुभप्रदाय । शुभेक्षणाय । शुभलक्षणाय । शुभांगाय नमः । ८२६०

शुभानंदाय नमः । शुभाक्षाय । शुभवदान्याय । शुभाभीष्टप्रदाय । शुभंकराय । शुभलक्षणलक्षिताय । शुभनाम्ने । शुभसंपदां दात्रे । शुभरूपाय । शुभ्राननाय । शुभ्राय । शुभ्रविग्रहाय । शुभ्राभ्रयूथधृते । श्वभ्यो नमः । श्रीभरद्वाजदीक्षोत्तमाघोर गुरवे । शीभ्याय । शोभनाय । शंभवे । शमरूपाय । शमाय नमः । ८२८०

शमनदमनाय नमः । शमप्राप्याय । शमदमविपुलवंद्याय । श्रमणाय । शमधनमूलधनाय । शमितवृजिनसहृचराय । शमेश्वराय । शम्याकमौलये । शम्याकस्रग्धराय । श्यामकायाय । श्यामार्धदेहाय । श्यामाहृतार्धविग्रहाय । श्यामाय । शामित्राय । श्रीमते । श्रीमहेशाय । श्रीमयाय । श्रीमत्कैलासशिखरनिलयाय । श्रीमतां वराय । श्रीमद्दक्षिण कैलासपक्षपाताय नमः । ८३००

श्रीमद्वरगुणाराध्यपादुकाय नमः । श्रीमहादेवाय । श्रीमहेश्वराय । श्रीमंत्रभाविताय । श्रीमद्धालास्यसुंदराय । श्रीमनोभाविताकृतये । श्रीमत्कुंडलीश्वरकुंडलाय । शेमुषीप्रदाय । शेमुषीमद्वृताय । श्रियावासिने । श्रीयंत्रराजराजाय । श्रेयसे । शयानेभ्यो । शयानाय । श्रेयोनिधये । शंयोरभिस्रवन्ताय । शरन्निशाकरप्रवालमन्दहासमंजुलाधरप्रकाशभासमानवक्त्रमण्डनश्रिये । शरणागतवत्सलाय । शरणागतदीनार्तपरित्राणपरायणाय । शरत्पूर्णेन्दुसंकाशाय नमः । ८३२०

शरण्यशरणाय नमः । शरभेश्वराय । शरत्कालप्रवर्तकाय । शरीरभूतभृते । शरीरस्थाय । शरीरत्रयरहितायापि सर्वज्ञाय । शर्वोत्तमागमयज्ञोपवीताय । शर्वरीकराय । शर्वरीहेतवे । शर्वागमसदाचारमर्यादाय । शर्वाणीमनोधीश्वराय । शरणागतराजेन्द्रत्राणशीलांघ्रये । शरणागतकल्पकाय । शरणागतार्तिहरणाय । शरणान्विताय । शरणत्राणतत्पराय । शरच्चन्द्रगात्राय । शर्मदाय । शरत्कालनाशकाय । शरन्नाथाय नमः । ८३४०

शरत्कालप्रवर्त्तकाय नमः । शरणाय । शरण्याय । शरणागतरक्षणाय । शरभाय । शरसर्वायुधाय । शर्वशंकराय । शर्वलिङ्गाय । शर्वाय । शरीरिणा शरीरयोगवियोगहेतवे ।

शारदावल्लभाय । शारदाभ्रातिशुभ्रांगाय । शारदानायकाय । शार्ङ्गिणे । शार्दूलचर्मवसनाय । शार्दूलाजिनभृते । शिरोहारिणे । शिरःकपालरुद्राक्षमालिकाय । शिरोधृतसुरापगाय । शिरीषमृदुलाकारवामार्धाय नमः । ८३६०

श्रीरामवरदायकाय नमः । श्रीरामचन्द्रतत्वार्थदेशिकाय । शूरदुरासदाय । शूराय । शूरमंडलमंडिताय । शूरसेनाय । शूराग्रेसराय । शौरये । शौर्यभाजनाय । शिल्पाय । शिल्पवैचित्र्यविद्योताय । शिलादसुतनिक्षिप्तराज्याय । शिलीमुखीकृतविधवे । शिलाकठिनपापौघभिदुराय । शिल्पिनां विश्वकर्मणे । श्रीलीलाकरपद्मनाभवरदाय । शूलपाणये । शूलभास्वत्कराय । शूलिने । शूलास्त्रास्त्रविदारितांधकसुरारातीन्द्रवक्षःस्थलाय नमः । ८३८०

शूलाय नमः । शूलाद्यायुधसंपन्नाय । शूलपाशांकुशचापहस्ताय । शूलटंकपाशदण्डपाणये । शैलाय । शैलाधीशसुतासहायाय । शैलादिप्रमुखैर्गणैः स्तुताय । शढलराजजामात्रे । शैलराजसुतापरिष्कृतचारुवामकलेवराय । शैलेन्द्रसुतापतये । श्रवणपुटोल्लसितोरगमस्तकमणिदीप्तिमृदुकपोलयुगाय । श्रविष्ठाय । श्रवणानंदभैरवाय । शिवाय । शिवज्ञानरताय । शिवतराय । शिवविद्यारहस्यज्ञप्रत्यज्ञाय । शिवालिङ्गिताय । शिवारंभाय । शिवमंत्रजपप्रियाय नमः । ८४००

शिवाजीवितेशाय नमः । शिवाकान्ताय । शिवादितत्त्वमयाय । शिवानन्दयुतानन्तमुनिमुक्तिमुदे । शिवदूतीसमाराध्याय । शिवाग्निप्रियाय । शिवागमज्ञहृन्मंचमध्यस्थाय । शिवज्ञानपयोराशिराकाभाय । शिवशक्तिलतामूलसुकंदाय । शिवतत्त्वार्थकुलिकशेखराय । शिवलिङ्गार्चनाव्यग्रनामदोग्घ्रे ।

शिवहृदयपाथोजभ्रमराय । शिवपाशभुजङ्गालिगरुडाय । शिवमुंडाभरणाय । शिवभस्मविलेपनाय । शिवमंत्राय । शिवंकराय । शिवलिङ्गाय । शिवतत्त्वाय । शिवतनवे नमः । ८४२०

शिवलक्ष्यस्वरूपिणे नमः । शिवपादाख्योर्ध्ववदनाय । शिवात्मभुव्यभिव्यक्तदिनेशाय । शिवादाम्पत्यदत्तोरुकरुणाय । शिवात्मकाय । शिवानाथाय । शिवासमेताय । शिवाराध्याय । श्रीवर्धनाय । श्रीवैद्यनाथाय । श्रीवल्लभाय । श्रीवधूनाथबाणाय । श्रीविद्याचक्ररूपिणे । श्रीविद्यानामरूपाय । श्रीविद्याभेदरूपिणे । श्रीवामदेवाय । श्रीविष्णुसर्वपूज्यत्ववरदाय । श्रीवल्लभशिवारंभाय । श्रीविभावनाय । श्रीविश्वनाथाय नमः । ८४४०

शैवलीलाय नमः । शैवानां शिवरूपिणे । शिवंकरनिजानंदसंपूर्णाय । शशधरशेखराय । शशाङ्कशेखराय । शशाङ्कार्धमौलये । शशाङ्काय । शशिकोटिकान्तिजालाय । शशिखंडशेखराय । शशिकलाभास्वत्किरीटज्वालाय । शशिशिखंडिने । शशिप्रभाय । शशिबिंदवे । शशिखंडमौलये । शशिखंडशिखण्डमंडनाय । शशिखंडमंडनाय । श्मशानवासिने । श्मशाननिलयाय । श्मशानाय । श्मशानरतिनित्याय नमः । ८४६०

श्मश्रुकर्षणाय नमः । शश्वद्बहिर्भूतनिरस्तपरिच्छेदकाय । शश्वत्प्रसन्नवदनाय । शशाङ्काङ्कितशेखराय । शाश्वताय । शाश्वताकाराय । शाश्वतैश्वर्यविभवसंयुताय । शाश्वतनिजाभासाय । शाश्वतैश्वर्याय । शाश्वतैश्वर्यविभवाय । शाश्वतस्थानवासिने । शाश्वतिकालयाय । शाश्वतधर्मगोप्त्रे । शाश्वतिकाकाराय । शाश्वतैश्वर्यबंधुराय । शिशिरात्मकाय । शिशिराय । शिशवे । शिशिरांशुकरोल्लासिकिरीटाय । शिशिरांशुकलाधराय नमः । ८४८०

शिशुपालविपक्षेन्द्राय नमः । शिशुत्वादिनिर्मुक्ताय । श्रीशाय । श्रीशैलपतये । श्रीशैले मल्लिकार्जुनाय । श्रीशैलवासाय । शैशिरर्तुप्रवर्तकाय । शष्प्याय । शुष्क्याय । शिष्टेष्टदाय । शिष्टाय । शिष्टाराध्याय । शिष्टाचारप्रदर्शकाय । शिष्टपोषणतत्पराय । शिष्टाभिलक्ष्याय । शिष्टाचारप्रियाय । शिष्टपूज्याय । शिष्यान्तरनिवासाय । शिष्यनामकज्ञात्रात्मने । शेषस्तुत्याय नमः । ८५००

शेषवासुकिसंसेव्याय नमः । शेषदेवादिपुरुषाय । शेष्यशेषकलाश्रयाय । शेषसंज्ञिताय । श्रेष्ठाय । शस्त्राय । शस्त्रहारिणे । शस्त्रभृतां रामाय । श्वसते । शास्त्राय । शास्त्रे । शास्त्रकराय । शास्त्रवित्तमाय । शास्त्रनेत्राय । शास्त्रसंवेद्याय । शास्त्रतत्त्वज्ञाय । श्रीसौम्यलक्षणाय । श्रीहालास्यनिवासिने । शाक्षरवामबाहवे । शिक्षितदानवाय नमः । ८५२०

शिक्षिताखिलकामादिघातकाय नमः । शिक्षितान्धकदैतेयविक्रमाय नमः । ८५२२

षकारस्य सूर्यो देवता धर्मकामार्थसिद्धौ विनियोगः ।

षट्काराय नमः । षट्कोणपीठमध्यस्थाय । षट्कृत्तिकासमाजस्थाय । षट्कोटितीर्थचर्याय । षट्चक्राय । षट्चक्रफणिभूषणाय । षट्चक्रभेदनाय । षट्छक्तिपरिवारिताय । षट्छास्त्रार्थतत्वविदे । षडध्वयागतत्पराय । षड्ऋतुकुसुमस्रग्विणे । षड्वर्गाय । षडक्षराय । षड्गुणाय । षडाधाराय । षड्विधात्मने । षडाम्नायरहस्यज्ञाय । षडंगुलमहाह्रदाय नमः । ८५४०

षडध्वध्वान्तविध्वंसिने नमः । षडात्मिकाय । षडाननपित्रे । षड्विधाकाराय । षडाधारनिवासकाय । षडाधारादिदैवताय । षडूर्मिरहिताय । षडूर्मिभयभेदकाय । षड्विकाररहिताय ।

षड्विंशकाय । षडैश्वर्यफलप्रदाय । षड्वैरिवर्गविध्वंसिने । षड्भूमये । षडध्वात्मने । षडंगांगाय । षडंगादिपदक्रमाय । षडंगात्मने । षंडाय । षडक्षरात्मने । षड्ग्रंथिभेदिने नमः । ८५६०

षोडशस्वरमातृकाय नमः । षोडशाब्दवयोयुक्तदिव्यांगाय । षोडशाधारनिलयाय । षोडशात्मस्वरूपाय । षोडशाब्द-कलावासाय । षोडशीकृतवज्रांगाय । षोडशेन्दुकलात्मकाय । षोढान्यासमयाय । षण्मुखाय । षण्मुखप्रीताय । षण्मुखजनकाय । षंवामपादनूपुराय । षष्ठाय । षष्ठीबालाय । षष्टिदाय । षष्टिभागाय । षष्ठीजपपरायणाय । षष्ठीनाथाथ । षष्ठीदोषहराय नमः । ८५७९

सकारस्य सरस्वती देवता । वाक्सिद्धौ विनियोगः ।

सकाररूपाय नमः । ८५८०

सकलाय नमः । सकलाधाराय । सकलागमपारगाय । सकलतत्वात्मकाय । सकललोकैककर्त्रे । सकललोकैकसंहर्त्रे । सकललोकैकगुरवे । सकललोकैकसाक्षिणे । सकलनिगमगुह्याय । सकलवेदान्ततारकाय । सकललोकैकशंकराय । सकलनिष्कलाय । सकलागममस्तकेषु संघोषितात्मविभवाय । सकलदुःखमूलहन्त्रे । सकलाम्नायान्तवेद्याय । सकलकल्याणदाय । सकलाघसंघ-निबर्हणाय । सकलभुवनभूतभाविताय । सकलस्थमतये । सकलमौनिज्ञेयाय नमः । ८६००

सकलजनगेयाय नमः । सकलसुरनुताय । सकललौकैक-पालनाय । सकलभुवनबंधवे । सकलाम्नायांतसंचारिणे । सकलेश्वराय । सकलेष्टदाय । सकलेप्सितदात्रे । सकृत्प्रणतसंसारमहासागरतारकाय । सकृत्प्रपन्नदौर्भाग्यच्छेद-काय । सकामारये । सक्ताय । संकल्पाय । संकर्षणाय । सकुंकुमविलेपनाय । संकेतकुलपालिने । संकीर्णमंदिरस्थाय ।

साकेतपुरवासिने। सिकत्याय। सुकराय नमः । ८६२०

सुकपोलाय नमः । सुकन्याय । सुकंधराय । सुकंठाय । सुकान्तये । सुकीर्तये । सुकेशाय । सुकुमाराय । सुकुमारमहापापहराय । सुकलितहालाहलाय । सुकविविनुताय । सुकोमलपादपद्माय । सुकृतराशये । सृकाविभ्यो । सूक्तानां पौरुषसूक्ताय । सैकताश्रयाय । सख्ये । संख्यायाः प्रभवे । संख्यासमापनाय । सांख्यप्रदाय नमः । ८६४०

सांख्याय नमः । सांख्ययोगाय । सांख्यानां पुरुषात्मने । सांख्यस्य प्रभवे । सुखकराय । सुखप्रदाय । सुखदुःख-विवर्जिताय । सुखसंस्थाय । सुखनिधये । सुखप्राप्त्येकहेतवे । सुखभावाय । सुखाधाराय । सुखासक्ताय । सुखासनाय । सुखाजाताय । सुखासनादिपंचमूर्तिप्रतिपादकोर्ध्ववदनाय । सौख्यस्य प्रभवे । सौख्यप्रदाय । सगणाय । सगरतनूजन्मसुकृतश्लाविजटाय नमः । ८६६०

सगुणनिर्गुणाय नमः । सगुणाय । संग्रहीतृभ्यो । संग्रहाय । संग्रामविधिपूजिताय । स्वंगाय । साङ्गवेदतुरंगोत्थहेषाक्षात्मने । सुगुणाय । सुगुणाकराय । सुगंधिदेहाय । सुगंडमंडल-स्फुरत्प्रभाजितामृतांशवे । सुगताय । सुगंधाराय । सुगतीश्वराय । सुगंधये । सुगुणार्णवाय । सुगंडाय । सुगीतिगायते । सुग्रीवाय । सौगतानां विज्ञानाय नमः । ८६८०

सृगालरूपाय नमः । संघृणीशाय । सुघोराय । सुघोषाय । सच्चिदानंदमूर्तये । सच्चिदानंदसिंधवे । सच्चिदानंदसंपूर्णस्वरूपाय । संचितपापविनाशनलिङ्गाय । संचितपापौघतिमिरसंहरणाय । संचाराय । सुचरित्राय । सुचक्षुषे । सुचित्राय । सुचारुकेशाय । स्वच्छाय । स्वच्छंदभैरवाय । स्वच्छंदाय । स्वेच्छामंत्रस्वरूपाय । सज्जनाय । सज्जनानुरागाय नमः । ८७००

सज्यकार्मुकहस्ताय नमः । सज्जनपरिपालकाय । सज्जनाश्रयाय । सज्जनपूज्याय । सज्जनपोषणाय । स्वजनानुरागाय । स्वजनपालनाय । सुजंघाय । सुजातानंतमहिम्ने । सुज्ञेयाय । सौजन्यनिलयाय । स्फटिकधवलांगाय । स्फटिकचारुमूर्तये । स्फटिकमालालंकृतवक्षसे । स्फटिकजपमालाहस्ताय । सटापटलभूषिताय । स्थाणवे । स्थाणुरूपाय । स्त्रीणां गिरिजायै । स्त्रैणसौम्याय नमः । ८७२०

सतां गतये नमः । सत्याय । सत्यव्रताय । सततस्तुताय । सत्यज्ञानसुखाय । सत्यसंभाषाय । सत्यवते । सत्यपराक्रमाय । सत्यधर्मपराक्रमाय । सत्यधर्मपरायणाय । सत्यकीर्तये । सत्यसंकल्पाय । सत्यवेधसे । सत्यवाचे । सत्यव्रतार्थसंतुष्टाय । सत्यरूपिणे । सत्यादिगुणसंभवाय । सत्यधिये । सत्यपदाय । सत्यसंधाय नमः । ८७४०

सत्येशाय नमः । सत्यचारित्रलक्षणाय । सत्यप्रत्ययाय । सत्यज्ञानप्रबोधिने । सत्यलोकनिवासिने । सत्वादिपंचमंत्रात्मकमंत्राध्वने । सत्यकीर्तिस्तंभकृतागमाय । सत्यव्रतमहात्यागिने । सत्यसंगराय । सत्यवित्तमाय । सत्यवाक्याय । सत्यचित्स्वभावाय । सत्यज्ञानसुखात्मकाय । सत्यज्ञानानंदमयाय । सत्यधर्मिणे । सत्यप्रियाय । सत्यप्रतिज्ञाय । सत्यासत्याय । सत्यलिंगाय । सत्यवादिने नमः । ८७६०

सत्यात्मने नमः । सत्त्ववते । सत्त्वानां पतये । सत्त्वगुणोपेताय । सत्त्वविदे । सत्त्ववत्प्रियाय । सत्त्वनिष्ठाय । सत्त्वमूर्तये । सत्त्वेशाय । सत्त्वाय । सत्त्वस्थाय । सत्परायणाय । सत्कर्त्रे । सत्कथाप्रियाय । सत्कृताय । सत्कृतये । सत्कृपाकराय । सत्कीर्तये । सते । सत्स्वरूपाय नमः । ८७८०

सत्सुंदराय नमः । सतीपतये । सतुङ्गभङ्गजह्नुजासुधांशु खंड मौलये । सतां भवच्छेदभवक्लेशनिमित्तोरुभवच्छेदकृते । सतां संतापनिवारकाय । सतां पतये । सतां शत्रुघ्नाय । संतृप्ताय । सत्तामात्रव्यवस्थिताय । संतोषजनकाय । सततोषितमुनि- हृदयाय । सात्विकाय । सात्विकप्रियाय । स्वात्मसूक्ष्म- दशोज्ज्वलाय । संतोषदायकाय । संतोषितसुरव्राताय । सितद्युतये । सितभस्म मंडिताय । सितांगराग प्रतिपन्न मानसाय । सितांगाय नमः । ८८००

स्थिताय नमः । स्थित्यै । स्थितीनां प्रभवे । स्मितमाधुर्य मधुरमुख मंडल मंडिताय । सितभानु विभातनुविलसनाय । स्मित भाषिणे । स्मितवक्त्राय । स्फीताय । सृत्याय । स्तुतिप्रियाय । स्तुतिनित्याय । स्तुताय । स्तुत्याय । स्तुत्यर्थाय । स्तुतये । स्तुति हर्षिताय । स्तुतोत्तमगुणाय । स्तुतितुष्टाय । स्तुतितोषाय । सुतंतवे नमः । ८८२०

सुतपसे । सुतीर्थाय । स्मृतिमते । स्मृतिरूपाय । स्मृत्यै । स्मृतीनां प्रभवे । सूताय । सूत्राय । सूत्रकाराय । सूत्रार्थाय । सूत्रभाष्य निबंधनाय । सूत्रप्रबोधकाय । सेतवे । सेतुबंधे रामेश्वराय । सोत्कंठ नीलकंठाख्योपकठनटते । स्तोत्र प्रियाय । स्तोत्रे । स्तोत्राय । स्तोत्रपादाय । स्तोत्ररताय नमः । ८८४०

स्तोत्रमयाय नमः । स्तोत्रसंतुष्टाय । स्रोतःस्थाय । स्वतंत्राय । स्वतंत्रशक्तिधाम्ने । स्वतंत्रगतये । स्वतंत्रशक्तिकवचाय । संततजाग्रते । संतत मंदास्मित सुंदरवदनाय । स्वतोऽनंताय । स्वतेजसाव्याप्त नभोवकाशाय । सदाशिवाय । सदाचाराय । सदात्मने । सदाशिवेश्वरेशान- विष्णुब्रह्मात्मने । सदागतये । सदाशिवलिंगाय । सदानंदाय । सदानंदभाजे । सदासुप्रकाशाय नमः । ८८६०

सदानिर्विकाराय नमः । सदाकर्त्रे । सदाशिवात्मक वदनाय । सदाशिवात्मक मूर्ध्ने । सदाशान्ताय । सदाशुद्धाय । सदा सामगानप्रियाय । सदाध्येयाय । सदाप्रियाय । सदाचरिताय । सदापुष्टाय । सदापुण्याय । सदायोगिध्येयाय । सदापुष्पप्रियाय । सदाद्वेषिणे । सदोद्गीर्णाय । सद्योजातादि पंचाग्निरूपाय । सदद्दष्टप्रदायिने । सदामर्षिणे । सदानंदनचरणाय नमः । ८८८०

सदायोगिने नमः । सद्वासनाशोभिताय । सदसदात्मकाय । सदयहृदयाय । सदयाय । सदयभावाय । सदसन्मयाय । सदसद्वृत्तिदायकाय । सद्सत्सर्वरत्नविदे । सदसद्वराय । सदसव्यक्ताय । सदसस्पतये । सदसत्सेव्याय । संदक्षिणपाद-कटीतटाय । सदस्याय । सद्योजाताय । सद्योजातात्मक पश्चिमवदनाय । सद्योजातात्मकमूलाधारकाय । सद्योगिने । सद्योजातात्मने नमः । ८९००

सद्योऽधिजाताय नमः । सद्योजातरूपाय । सद्रोहदक्षसवन-विघाताय । सद्योजातात्मकपादाय । सद्भूताय । सद्भिस्संपूजिताय । सद्गुणाय । सान्द्रानंदसंदोहाय । स्कंदाय । स्कंदगुरवे । सुदर्शनाय । सुदेवाय । सुदृशे । सुदीप्ताय । सुंदराय । सुंदरताण्डवाय । सुंदरभ्रुवे । सुंदरविग्रहाय । सुंदरचेष्टिताय । सुंदरसायकाय नमः । ८९२०

सुंदरनाथाय नमः । सुंदरेश्वराय । सूदराय । सूद्याय । सौदामिनीसमच्छायसुवस्त्राय । सौन्दर्यवते । सौन्दर्यसागरोद्भूत-शंखसन्निभकंधराय । सौन्दर्यवल्लिवल्लभाय । सद्धर्मिणे । साधनाय । साधवे । साध्याय । साध्यासाध्य प्रदायिने । साध्यासाध्य-समाराध्याय । साधारणाय । साधुविदे । साध्यर्षये । स्वाधिष्ठानाय । स्वधाशक्तये । संधये नमः । ८९४०

संधात्रे नमः । संध्याभ्रवर्णाय । संध्याताण्डव-संरंभाघूर्णदिविषदे । स्वधर्मभंगभीतश्रीमुक्तिदाय । स्वधर्मपरि-पोषकाय । स्वधृताय । सिद्धये । सिद्धिलेशव्ययकृतवरवेषाय । सिद्धयोगिने । सिद्धिप्रवर्तकाय । सिद्धसाधकाय । सिद्धार्थाय । सिद्धाय । सिद्धार्चितपदांबुजाय । सिद्धभूतात्मकाय । सिद्धबृन्दार-कवंदिताय । सिद्धमार्गप्रवर्तकाय । सिद्धसुरासुरसेवितलिङ्गाय । सिद्धाश्रयाय । सिद्धिनायकाय नमः । ८९६०

सिद्धिभूषणाय नमः । सिद्धसंघानुगीताय । सिद्धवंदि-स्तुताय । सिद्धगणैरीड्याय । सिद्धगंधर्वपूज्याय । सिद्धस्वरूपिणे । सिद्धिसाधकरूपाय । सिद्धसंघातगीताय । सिद्धिमतां प्रभवे । सिद्धेश्वराय । सिद्धानां कपिलाय । सिद्धान्तैर्निश्चिताय । सिद्धान्ताय । सिद्धानां पतये । सिद्धागमललाटादिकाय । सिद्धौघानन्दरूपिणे । सिद्धलक्ष्मीमनोहराय । सिद्धसाध्य-प्रपूजिताय । सिद्धसुरासुरेन्द्रनमिताय । सीधुपानोन्मद मदनमदोन्माद मत्तालिकाली तालीसंताड्यमानोद्भटमुरजर-वाडम्बरोल्लासितांगाय नमः । ८९८०

सिंधवे नमः । सिंधुराजिनचेलाय । सुधन्विने । सुधाम्ने । सुधाकराश्रितमस्तकाय । सुधाहस्ताय । सुधिये । सुधाकरजगच्चक्षूरथांगाय । सुधामयूखरेखया विराजमान-शेखराय । सुधीराय । सुधीन्द्राय । सनकसनंदनसन्नुतांघि-विलसत्प्रसूनाय । सनकादिमुनिध्येयाय । सनकादिवशिष्ठादिमुनि-वंद्याय । सनकादिसमायुक्तदक्षिणामूर्तये । सनत्कुमाराय । सनंदनपरीवृताय । सनंदनसनातनाय । सनातनाय । स्वनाथाय नमः । ९०००

स्वनामसदृशसौन्दर्यान्विताय नमः । सन्नुतामलनाम्ने । सन्निवासाय । सन्निरूपकाय । सन्मार्गसूचकाय । स्वानंदमूलाय ।

स्वानंदामृतनिर्भराय । स्वानुभूत्येकमानाय । सन्मार्गसूचकार्थ-विदे । सन्मीनेक्षणाय । सन्मित्राय । संन्यासिने । संन्यासकृते । स्वानुभवाय । स्थानदाय । सानंदांकुराय । सानंदमुनिविज्ञात-हराख्याभूतये । सुनयनाय । सुनासाय । सुनिश्चलाय नमः । १०२०

सुनिष्पन्नाय नमः । सुनीतये । सूनास्त्रविनाशनाय । सुनीताय । सूनृताय । सेनान्ये । सेनापतये । सेनानीनां पावकये । स्वेन तेजसा दीप्तिमते । सेनाकल्पाय । सेनाभ्यो । सेनानिभ्यो । स्तेनरक्षकाय । स्तेनानां पतये । स्फें । स्त्रैं । सप्तधाचाराय । सप्तलोकधृते । सप्तजिह्वाय । सप्तलोकाय नमः । १०४०

सप्तवाहनाय नमः । सप्तकोटि महामंत्र मंत्रिता वयवाय । सप्तकोटि महामंत्र पूजिताय । सप्तकोटि महामंत्र रूपाय । सप्तविंशतियाग कृते । सप्तकोटि महामंत्र मंत्रितावयवद्युतये । सप्तर्षीणां पतये । सप्तर्षिभ्यो । सप्तर्षिवंदिताय । सप्तर्षिगण वंदिताय । सप्तपाताल चरणाय । सप्तद्वीपोरुमंडिताय । सप्तस्वर्लोक मकुटाय । सप्तसप्तिवर प्रदाय । सप्तछंदोनिधये । सप्तहोत्राय । सप्तस्वराश्रयाय । सप्तमातृनिषेविताय । सप्तच्छदामोदमदाय । सप्तच्छंदोमयप्रभवे नमः । १०६०

सप्तविंशति तारेशाय नमः । सप्ताश्वाय । सप्तैधसे । सप्तांगराज्य सुखदाय । सप्ताब्धिकेलिकासाराय । सप्रेमहृदयपरिपाकाय । सप्रेमभ्रमराभिरामाय । सम्पूर्ण कामाय । सम्पत्प्रदाय । सम्प्रतर्दनाय । स्थपतये । स्वपते । स्वपदभूषीकृतसर्वमस्तकचयाय । स्वपद्भ्यो । स्वापवर्जिताय । स्वापनाय । स्वप्रकाशामनस्काख्ययोगलभ्याय । स्वप्रकाशाय । स्वप्रकाश स्वरूपाय । स्वप्रकाशात्मस्वरूपिणे नमः । १०८०

स्वप्नगाय नमः । स्वप्नाय । साम्प्रदायकाय । सुप्रदीपाय । सुपसन्नाय । सुप्रकाश स्वरूपाय । सुप्रभेदागमनाभये । सुप्रभाय । सुप्रसादाय । सुप्रतीकाय । सुप्रतापनाय । सुप्रजाताय । सुपात्राय । सुपोषाय । सुपाशाय । सुपर्णाय । सुपर्णवाहनप्रियाय । सुपुष्पाय । सुप्रीताननतेजसे । सुप्रीताय नमः । ९१००

सफलोदयाय नमः । सांबाय । सुबलाय । सुबलाढ्याय । सुबुद्धये । सुबल बाणासुरवरप्रदाय । सुबीजाय । सुबंध विमोचनाय । सुबांधवाय । सुब्रह्मण्याय । सभापतये । सभानाथाय । सभावनाय । सभाभ्यो । सभापतिभ्यो । संभाव्याय । संभग्राय । संभ्रमाय । संभूतये । संभवाय नमः । ९१२०

स्वभावाय । स्वभावरुद्राय । स्वभावनिर्मलाभोगाय । स्वभक्तजन संतापपापापद्भंगतत्पराय । स्वभक्ताखिलदायकाय । स्वभावानल दीप्तये । स्वभावोदारधीराय । स्वभावसिद्धाय । स्वभावभद्राय । स्त्रभावार्धाय । स्वभावोत्कृष्टसद्भावाय । स्वभाव पूज्याय । स्वाभरणप्रियाय । सुभोगिने । सुभगाभक्तिवैराग्य-प्रसन्नाय । सुभद्रवते । सुभक्तिदाय । सुभुजाय । स्वभुजे । सुभगासंश्रितपदाय नमः । ९१४०

सुभक्ति धेनुपालकाय । सुभगाय । सुभासे । सोभ्याय । सौभाग्यरस जीवातुसारासार विवेकदृशे । सौभाग्य वर्धनाय । सौभगाय । सौभाग्यनिधये । समस्तजगदाधाराय । समस्त-सुमनःपूज्याय । समस्तजगतां नेत्रे । समस्तदेवानां वृत्तिदाय । समस्तदेवेश्वराय । समस्तसिद्धये । समस्तगीर्वाणलोकशरण्याय । समस्तलोकविग्रहाय । समस्तगुणसागराय । समस्तदुःख-विध्वंसिने । समस्तानंदकारणाय । समस्तामरलोकपूजिताय नमः । ९१६०

समस्तसुरसेविताय नमः । समस्तर्षये । समस्तैकबंधवे । समस्तजगतां नाथाय । समस्तसाक्षिणे । समस्तकल्याण-निधानाय। समष्टिविद्यानगरीनायकाय । समस्वरूपाय । समस्ताय । समग्राय । समयाय । समदृष्टये । समरमर्दनाय । समंजसाय । समाराय । समर्चिताय । समदशत्रुघ्नाय। समग्रतेजसे । समवर्तिने । समस्तोत्राय नमः । ९१८०

समयासमयाचाराय नमः । समासतद्धिताकाराय । समानाय । समाय । समानाधिकवर्जिताय । समानाभिगम्याय । समाधिकृते । समाम्नायाय । समायुक्ताय । सम्राडाकृतिधवल-पश्चिमवदनाय । सम्राजे । समिद्धाय । समिद्धोमप्रियाय । सम्मिताय । समित्यधिष्ठिताय । समितिंजयाय । समीराहारात्म-प्रवणजनहृत्पद्मनिलयाय । समीराहारेन्द्रांगदाय । समीहनाय । समुद्राय नमः । ९२००

समुद्रोद्भूतगरलकंधराय नमः । समुद्रवनसाराय । समुद्रव्योममध्यस्थाय । समुद्रतनयाराध्याय । स्वमूर्तिकेलि-संप्रीताय । समृद्धिमते । समृद्धिश्रियै । समृत्युकप्रपंचौघ-महाग्रासाय । सामगाय । सामवेदाय । सामगायकाय । सामसुज्येष्ठसाम्ने । सामवेदप्रियाय । सामप्रियाय । सामगेयाय । सामगप्रियाय । सामवेत्रे । सामलिंगाय । सामेक्षणाय । सामर्थ्याय नमः । ९२२०

साममयाय नमः । सामगानविनोदनाय । सामगानप्रियाय । सामगानरताय । सामपंचदशाय । साम्नां धाम्ने । सामगानसमाराध्याय । सामवेद्याय । सामान्याय । सामास्याय । सामान्यदेवाय । सामाग्र्याय । स्वामिध्येयाय । स्वामिचित्तानुवर्तिने । स्वामिने । सुमंगलसुमंगलाय । सुमंदाय । सुमेखलाय । सुमंगलाय । सुमहास्वनाय नमः । ९२४०

सुमध्यमाय नमः । सुमनसे । सुमनोऽलंकृतशिरसे । सुमनःसेव्याय । सुमनःशेखराय । सुमीनाक्षीवक्त्रांबुजतरुणसूर्याय । सुमुखरागाय । सुमुखाय । सुमृडीकाय । सुमूर्तये । सौमार्धधारिणे । सोमधराय । सोमाधाराय । सोमपादाय । सोमकलाधरमौलये । सोमसन्दराय । सोमनाथाय । सोमविभूषणाय । सोममयाय । सोमसूर्याग्निलोचनाय नमः । ९२६०

सोमसोमरताय नमः । सोमसोमप्रियाय । सोमपाय । सोमभूषणाय । सोमपावकमार्तांडलोचनाय । सोमास्कंदाय । सोमवह्निचक्षुषे । सोमकलाधराय । सोमवारिनभोहुताशनसोमपानिलखाकृतये । सोममंडलगाय । सोमाय । सोमेशाय । सौम्यवक्त्राय । सौम्यदंष्ट्राविभूषिणे । सौम्यवक्त्राधराय । सौम्यरूपाय । सयज्ञारये । संयोगाय । संयुगापीडवाहनाय । संयुताय नमः । ९२८०

संयोगिने नमः । संयमिने । संयमिध्येयाय । स्वयंभूताय । स्वयमादिविवर्जिताय । स्वयमप्रणतात्मने । स्वयंप्रभावाय । स्वयंभुवे । स्वयंज्योतिषे । स्वयंप्रभवे । स्वयंभ्वागममस्तकाय । स्वयंभुवेद्याय । स्वयंपंचब्रह्मादिमूर्तये । स्वयंसर्वाधाराय । स्वयंविश्वभासकाय । स्वयंप्रकाशाय । स्वयंज्योतिःस्वरूपिणे । स्वयंभूपूजिताय । स्वयंजाताय । स्वयंसिद्धाय नमः । ९३००

स्वयंप्रकाशचिरन्तनाय नमः । स्वयंव्यक्ताय । स्वयंभुवे । सायं ताण्डवसंभ्रमाय । सायकचक्रधारिणे । स्तायुरक्षकाय । स्तायूनां पतये । स्वायुधाय । सुयुक्ताय । सुयज्ञाय । सुयामुनाय । सुयशःश्रीमुखवधूसंगीतास्वादिने । स्तूयमानाय । सरसाय । सरसांबुनिधये । सरससुभाषणाय । सरस्वत्याश्रयाय ।

सरसचित्रगतये । सरसगुणयुताय । सरसमृदुभाषाय नमः । ९३२०

सरससुफलदाय नमः । सरसगुणगणाय । सरसवदनाय । सरस्वत्यम्बुसेविताय । सरसिजविपक्षचूडाय । सरसिज-कुवलयजागरसंवेशन जागरूकलोचनाय । सरसीरुहसंजात-प्राप्तसारथये । सरसीरुहपत्रायतदृशे । सरस्याय । सरिज्जटालाय । सर्गस्थितिविनाशानां कर्तृप्रेरकाय । सर्गाणां पतये । सर्वसाक्षिणे । सर्वप्रदाय । सर्वतःकृतासनाय । सर्वत्रपाणिपादाय । सर्वतोमुखाय । सर्वस्य जगतः पात्रे । सर्वलोकानां नेत्रे नमः । ९३४०

सर्ववेदान्तपारगाय नमः । सर्वशास्त्रार्थसंपन्नाय । सर्वसौभाग्यनिलयाय । सर्वकारणाय । सर्वहृते । सर्वकृते । सर्वलोकेशाय । सर्वसृष्ट्यर्थाय । सर्वाभीष्टफलप्रदाय । सर्वलोकैकजीवातवे । सर्वज्ञाय । सर्वभावकराय । सर्वशुभंकराय । सर्वशस्त्रभृतां वराय । सर्वप्रपंचसृष्ट्यादिपंचकृत्यकर्त्रे । सर्वदिव्यैरलंकृताय । सर्वलोकविभूषणाय । सर्वधर्मज्ञाय । सर्वभूतप्रियाय । सर्वभूतपतये नमः । ९३६०

सर्वसुरश्रेष्ठाय नमः । सर्वसुराधिपाय । सर्वपापक्षयाय । सर्ववेदमंत्रजनकपंचवदनाय । सर्वज्ञशक्तिहृदयाय । सर्वतः पाणिपादाय । सर्वरोगविनाशनाय । सर्वकल्मषनाशिने । सर्वसंपदां दात्रे । सर्वसंपदां प्रभवे । सर्वदेवस्तुताय । सर्वभूतात्मभूताय । सर्वसंहरणाय । सर्ववेदार्थविदुषां स्वायंभुवाय । सर्वरक्षसां निरृतये । सर्वलोकैकसंहर्त्रे । सर्वलोकैकनिर्मात्रे । सर्वजनसद्गुरवे । सर्वगाय । सर्वगुणाकराय नमः । ९३८०

सर्वशास्त्रे नमः । सर्वदेवानां पालकाय । सर्वमूर्तानामादिकर्त्रे । सर्वशक्तिधराय । सर्वहृत्सन्निविष्टाय । सर्वपापहराय । सर्वभोगसमृद्धाय । सर्वज्ञमूर्तये । सर्वशाखाधिपतये । सर्वसहाचक्रस्यंदनाय । सर्वनिहंत्रे । सर्वगुह्यपिशाचानां पतये । सर्वगुणोपपन्नाय । सर्वस्वरूपिणे । सर्वलोकानां प्रभवे । सर्वसच्चित्सुखात्मकाय । सर्वकल्याण-कारणाय । सर्वजगतां कारणाय । सर्वसौभाग्यसिद्धिदाय । सर्वमंगलहेतवे नमः । ९४००

सर्वभूतानामाधाराय नमः । सर्वभूतानामनुग्रहपरायणाय । सर्वजगतामधिपाय । सर्वहृदयैकनिवासाय । सर्वदेवादिदेवाय । सर्वमंत्राधिष्ठिताय । सर्वमंत्रस्वरूपाय । सर्वशक्तिधाम्ने । सर्वस्मै । सर्वसत्वावलंबनाय । सर्वधर्मफलप्रदाय । सर्वविदे । सर्वरोगघ्नाय । सर्वगोप्त्रे । सर्वशास्त्ररहस्यविदे । सर्वशक्तिप्रपूजिताय । सर्वजिते । सर्वधर्मसमन्विताय । सर्वज्ञाननिधये । सर्वलोकैकभूषणाय नमः । ९४२०

सर्वसुगंधिसुलेपितलिंगाय नमः । सर्वसमुद्भवकारण-लिंगाय । सर्वशंभवे । सर्वदेवतपोमयाय । सर्वसाधनाय । सर्वलोकप्रजापतये । सर्वपापहराय । सर्वबंधविमोचनाय । सर्वशासनाय । सर्वास्त्रप्रभंजनाय । सर्वदेवोत्तमोत्तमाय । सर्वभूतमहेश्वराय । सर्वसहाय । सर्ववाहनाय । सर्ववेदात्मने । सर्वसर्वंसहोच्छ्रायस्यंदनश्रीमते । सर्वशास्त्रस्वरूपिणे । सर्वसंगविवर्जिताय । सर्वभूतहृदिस्थाय । सर्वतीर्थमयाय नमः । ९४४०

सर्वलक्षणसंपन्नाय नमः । सर्वशक्तिसमायुक्ताय । सर्वकारणाय । सर्वदेवसमाराध्याय । सर्वभयघ्नाय ।

सर्वमंगलदायकाय। सर्वभक्षकाय। सर्वलोकेशाय। सर्वजीवदया-पराय। सर्वदेवनमस्कृताय। सर्ववागीश्वरेश्वराय। सर्वपूरकाय। सर्वरोगप्रशमनाय। सर्वरोगविवर्जिताय। सर्वप्रकृष्टाय। सर्वज्वरभयापनयनाय। सर्वदर्शनाय। सर्वतश्चराय। सर्व-प्रवर्तनाय। सर्वतश्चक्षुषे नमः। १४६०

सर्वव्यापिने नमः। सर्वभूतदमनाय। सर्वविद्याधिदैवताय। सर्वविद्याविशारदाय। सर्वविद्याप्रदायिने। सर्वजयिने। सर्वरूपधृते। सर्वलक्षणलक्षण्याय। सर्वशक्तये। सर्वसंश्लिष्टाय। सर्वतःसमाय। सर्वगोचराय। सर्वसूत्रदृशे। सर्वधाम्ने। सर्वनियोजकाय। सर्वमोहनाय। सर्वदेवप्रियाय। सर्वदेवमयाय। सर्वश्रेयसे। सर्वहिताय नमः। १४८०

सर्वकर्मफलप्रदाय नमः। सर्वकर्मविवर्जिताय। सर्वविघ्नांतकाय। सर्वगर्वजिते। सर्वमंत्रफलप्रदाय। सर्वदुःखघ्ने। सर्वदुःखविमोचनाय। सर्वदुःखातिगाय। सर्वज्ञशक्तये। सर्वज्ञानप्रबोधिने। सर्वतीर्थस्थिताय। सर्वपर्वतवासिने। सर्वशास्त्रस्वरूपिणे। सर्वभूतप्रभंजनाय। सर्ववर्णाय। सर्वमायाप्रभंजनाय। सर्वसंपत्तिजनकाय। सर्वभर्त्रे। सर्वतंत्रप्रसूतये। सर्वव्याधिचिकित्सकाय नमः। १५००

सर्वज्ञानसंपन्नाय नमः। सर्वपापप्रभंजकाय। सर्वपावनाय। सर्वदारिद्र्यशमनाय। सर्वतोभद्रवासिने। सर्वशास्त्रार्थवादिने। सर्वशास्त्रार्थप्रदर्शकाय। सर्वसत्यदर्शिने। सर्वदर्शिने। सर्वप्रत्ययसाधकाय। सर्वप्रमाणसंपत्तये। सर्वमंगलाय। सर्वमंगलमांगल्याय। सर्वमंगलसंपन्नाय। सर्वमांगल्यदायिने। सर्वसांकर्यदोषघ्ने। सर्वयोगप्रदायिने। सर्वचैतन्यरूपिणे। सर्वहृत्सन्निविष्टाय। सर्वसिद्धिप्रदाय नमः। १५२०

सर्वयज्ञफलप्रदाय नमः । सर्वभक्तसमुत्सुकाय । सर्वकामप्रपूरकाय । सर्वभूताशयस्थिताय । सर्वभूतदमनाय । सर्वभूतनिवासाय । सर्वलोकानामंतकाय । सर्वलोकमहेश्वराय । सर्वलोकसुखावहाय । सर्वलोकशुभंकराय । सर्वलोकेश्वराय । सर्वाशापरिपूरकाय । सर्वदिग्वाससे । सर्वशक्तिमते । सर्वदेहिनां शरण्याय । सर्वदेवात्मकाय । सर्ववश्यकराय । सर्ववेदमूर्तये । सर्ववेदार्थसंपत्तये । सर्ववेदान्तनिलयाय नमः । ९५४०

सर्वग्रहरूपिणे नमः । सर्वकारणकारणाय । सर्वभेषजभेषजाय । सर्वयोगविनिःसृताय । सर्वसम्मताय । सर्वपोषकाय । सर्वविभवशालिने । सर्वात्मकाय । सर्वाभरणसंयुक्ताय । सर्वाधाराय । सर्वादये । सर्वालंकार-संयुक्ताय । सर्वात्मलिङ्गाय । सर्वात्मभुवे । सर्वातिशयाय । सर्वार्तिहराय । सर्वान्तर्यामिणे । सर्वात्मज्योतिषे । सर्वापन्मोचकत्वेष्ट सर्वोपास्याय । सर्वात्मान्तरवर्तिने नमः । ९५६०

सर्वाभीष्टफलप्रदाय नमः । सर्वान्ताय । सर्वातिशयाय । सर्वाचाराय । सर्वायुधधराय । सर्वाध्यक्षाय । सर्वाश्रयाय । सर्वांगाय । सर्वायुधविशारदाय । सर्वावासाय । सर्वाशयाय । सर्वांगरूपाय । सर्वांगसुंदराय । सर्वावयवसंदीप्ताय । सर्वाभरणभूषिताय । सर्वार्थसाधनोपायाय । सर्वाघनाशनाय । सर्वाक्षोभ्याय । सर्वात्मगोचराय । सर्वामरमुनीश्वराय नमः । ९५८०

सर्वानवद्याय नमः । सर्वासुनिलयाय । सर्वालंकार-संशोभिताय । सर्वावयवसंपूर्णाय । सर्वार्थसाधकाय । सर्वेश्वरेश्वराय । सर्वेन्द्रियगोचराय । सर्वेप्सितप्रदाय । सर्वेषां

सर्वदाय । सर्वेश्वराय । सर्वोपरिचराय । सर्वोत्तमाय । सर्वेश्वर्यसमन्विताय । सर्वेष्टाय । सर्वेषां प्राणिनां पतये । सर्वैश्वर्यसंपन्नाय । सर्वेङ्गितज्ञाय । सर्वोरगेश्वराय । सर्वोपाधिविनिर्मुक्ताय । सर्वोपास्याय नमः । ९६००

सर्वोपद्रवनाशनाय नमः । सर्वोपनिषदास्थिताय । सर्वोत्तुंगाय । स्वर्णरत्नांगदलसत्पञ्चद्वयभुजान्विताय । स्वर्णवर्णशेषपाशशोभिताङ्गमण्डलाय । स्वर्णकेशाय । सर्पभूषाय । सर्पहाराय । सर्पयज्ञोपवीतिने । सर्पग्रैवेयकाङ्गदाय । सर्पराजोत्तरीयाय । सर्पप्रोतकपालशुक्तिशकलव्याकीर्ण-पञ्चोरगाय । सर्पाधिराजौषधिनाथयुद्धक्षुभ्यज्जटामंडलगह्वराय । स्वर्गमार्गनिरर्गलाय । स्वर्गापवर्गदात्रे । स्वर्धुन्यूर्ध्वजलक्लिन्नजटा-मण्डलमण्डिताय । स्वर्धुनीचन्द्रशकलविराजितकिरीटकाय । सरोजकिंजल्कसमानवर्णाय । स्मराराराय । स्मरप्राणदीपकाय नमः । ९६२०

स्मरांतकाय नमः । स्मरहराय । स्मरशासनाय । स्मरमदविनाशनाय । सारससंभवसन्नुताय । सारंगद्विजसंता-पशमनाय । सारग्रीवाय । सारविशारदाय । सारसाक्षसमुज्जृंभ-सायकाय । सारभूताय । सारग्राहिणे । सार्वकालिकसंसिद्धये । स्थिराय । स्थिरधन्विने । स्थिरभक्तियोगसुलभाय । स्थिरविज्ञानाय । स्थिरप्रज्ञाय । स्थिरयोगाय । स्थिरमार्गाय । स्थिरासनाय नमः । ९६४०

स्थिरागमाय नमः । सुरविद्विषां प्रह्लादाय । सुरगुरुसुरवरपूजितलिङ्गाय । सुरवनपुष्पसदार्चितलिङ्गाय । सुरवंद्यपादाय । सुरसिद्धनिवासाय । सुरगुरुप्रियाय । सुरदेवाय । सुरभ्युत्तरणाय । सुरशत्रुघ्ने । सुरभये । सुरकार्यहिताय ।

सुरवल्लभाय। सुरनिम्नगाधराय । सुरवरमुनिसेबिताय । सुरम्यरूपाय। सुरमुनिसन्नुताय। सुरगणैर्गेयाय। सुरगणार्चित-पादाय। सुरपतिस्तुताय नमः। ९६६०

सुरमुनिगणसुप्रसादकाय नमः। सुरमुनिस्वान्ताम्बुजाता-श्रयाय। सुरारिघ्ने। सुराग्रगण्यदेवाय। सुरासुराराधितपादपद्माय। सुरासुरनमस्कृताय । सुराधिपाय । सुरारिसंहर्त्रे । सुराङ्गनानृत्यपाराय । सुरुचिररुचिजालाय । सुरेशोरुकिरीट-नामरत्नावृताष्टापदविष्टराय। सुरेशाद्यभिवन्दिताय। सुरेशानाय। सुरोत्तमाय । सुरोत्तमोत्तमाय । सूर्यकोटिविभासुराय । सूर्यमण्डलमध्यगाय । सूर्याणां पतये । सूर्यचन्द्राग्निग्रह-नक्षत्ररूपिणे। सूरिजनगेयाय नमः। ९६८०

सूरिपोषकाय नमः । सूरिगानप्रियाय । सूर्यकोटिसभ-प्रभाय। सूर्याग्निनयनाय । सूर्यचन्द्राग्निपीठस्थाय । सूर्याग्निसोमवर्णाय। सूर्याय। सूर्यतापनाय। स्फुरन्मकरकुण्डलाय। स्मेराननाय। स्मेरांचिताननाम्भोज करुणापूरितेक्षणाय। सौराष्ट्रे सोमनाथाय। सौराणां भास्कराकाराय। सौराष्ट्रे ज्योतिर्मयाय। संसारसारथये। संसाराम्राय। संसारसमुद्रसेतवे। संसारार्णव-मग्नानां समुद्धरणहेतवे। संसारमोचकाय। सस्मितमुखाय नमः। ९७००

स्वस्तिदाय नमः । स्वस्तिभुजे । स्वस्थाय । स्वसेवासमायातदेवासुरेन्द्रानमन्मौलिमन्दारमालाभिषिक्ताय । सस्पिञ्जराय । सुसंकल्पाय । स्वस्वरूपाय । स्वसंवेद्याय । संसारतारकाय । संसारभयनाशनाय । संसारवैद्याय । संसेवितभृगुतुंगाय । सुसहाय । सुसस्याय । सुस्थिराय । सुस्वप्नाय। सुस्वप्नफलदायकाय । सुसंक्षेपाय । सुस्नाताघविपाटकाय। सुस्मिताननाय नमः। ९७२०

सहस्राक्षाय नमः । सहस्रपत्रनिलयाय । सहस्रपदे । सहस्रफणिभूषणाय । सहस्रनामसंस्तुत्याय । सहस्रबाहवे । सहस्रयुगधारिणे । सहस्रपादचाराय । सहस्रमूर्ध्ने । सहस्रमूर्तये । सहस्राक्षबलावहाय । सहस्रलोचनप्रभृत्यशेषलेखशेखर प्रसून-धूलिधोरणी विधूसरांघ्रिपीठभुवे । सहस्रागमकटीतटाय । सहस्रभानुसंकाशचक्रदाय । सहस्रकोटितपनसंकाशाय । सहस्रारमहामंदिराय । सहस्रलिंगाय । सहस्रदलमध्यस्थाय । सहस्रप्रणवाय । सहस्रनयनादिवन्दिताय नमः । १७४०

सहस्रार्कच्छटाभास्वद्विमानांतस्थिताय नमः । सहमानाय । सहजानंदाय । सहजानंदसंदोहसंयुक्ताय । सहिष्णवे । संहर्त्रे । संहारकर्त्रे । संहारमूर्तये । सह्यगोदावरीतीरवासाय । स्वाहाकाराय । स्वाहाशक्तये । सिंहस्कंधाय । सिंहशार्दूलरूपाय । सिंहदंष्ट्राय । सिंहवाहनाय । सिंहसंहननाय । सुहृदे । सुहोत्राय । सुहृत्प्रियाय । साक्षिणे नमः । १७६०

साक्षात्कैवल्यरूपिणे नमः । संक्षेप्त्रे । साक्षान्मंगल-दैवताय । साक्षात्कैवल्यदायकाय । सूक्ष्मतनवे । सूक्ष्मात्सूक्ष्म-परागतये । सूक्ष्मात्मने । सूक्ष्मगोचराय । सूक्ष्मप्रमाणभूताय । सूक्ष्मार्थविदे । सूक्ष्मकार्यार्थदर्शिने । सूक्ष्मागमगुह्यकाय नमः । १७७२

हकारस्य हंसो देवता । आयुरारोग्यसिद्ध्यर्थे विनियोगः ।

ह्रींकृताय नमः । ह्रींकारारामशारिकाय । ह्रींकारसौध-राजाय । ह्रींकारधुनीहंसाय । हुंकारजपसंतुष्टाय । हंत्रे । हतपापवृंदाय । हृत्पुंडरीकशयनाय नमः । १७८०

हृत्पुंडरीकसंस्थाय नमः । हृत्पुंडरीकान्तरसन्निविष्टाय । हृतरागाय । हृत्पंकजसमासीनाय । हृत्पद्ममध्यनिलयाय ।

हृत्पद्मकर्णिकाशायिने। हृत्कमलस्थाय। हितमतये। हितकारिणे। हिताहितसमाय। हितैषिणे। हितकृत्सौम्याय। हुतप्रियाय। हुताशनाय। हुताशनसहायाय। हुतभुग्ज्वालाकोटिभानुसमप्रभाय। हेतिभिः समलंकृताय। हेतुभूताय। हेतिधृते। हृद्याय नमः। ९८००

हृदि सन्निविष्टाय नमः। ह्लादनाय। ह्रीनाय। ह्रींबीजजपचिह्निताय। हिमवद्गिरिसंश्रयाय। हिमघ्ने। हिमनायकाय। हिमांगाय। हिमालये केदाराय। हिमाचलेन्द्रतनयावल्लभाय। हिमचन्दनकुन्देन्दुकुमुदाम्भोजसन्निभाय। हिमाद्रिजाताकुचकुंकुमांकवक्षःस्थलालोलशिवाक्षमालाय। हिमाचलकृताश्रयाय। ह्रीमते। हेमांगाय। हेमरूपाय। हेमांशुकाय। हेमगर्भाय। हेमलिङ्गाय। हेमरेतसे नमः। ९८२०

हेमाद्रिचापाय नमः। हैमवतीपतये। हैमचीरांबराय। हयशीर्षाय। हरये। हराय। हर्यक्षाय। हर्यश्वाय। हरीश्वराय। हर्त्रे। हरिकेशाय। हरिहराय। हर्षप्रदाय। हरयोगिने। हरिवाहाय। हरिध्वजाय। हरिमार्गरताय। हरिद्वर्णाय। हरात्मकाय। हरिमानसतोषणाय नमः। ९८४०

हरिताय नमः। हरिनायकाय। हरिविरिञ्चिसुराधिपपूजिताय। हरिकराघातप्रभूतानकध्वानसंतुष्टाय। हरिकेशिने। हरिनेत्राय। हरिनयनपद्मार्चितपदाय। हरिकेशेभ्यो। हरिनंदीशहस्ताब्जालंबनाय। हरिसुलोचनाय। हरेः कायापहारिणे। हर्यक्षवाहनाय। हरिदंबराय। हरिश्चन्द्राय। हरिप्रियाय। हरिणाक्षाय। हरित्क्षौमाय। हर्यग्रींद्रात्मने। हारिणे। हारायितफणिराजफणामणि विराजिताय नमः। ९८६०

हारीतवरदाय नमः । हारकर्पूरगौरशरीराय । हारकुंडलकेयूरादिभूषिताय। हारीकृतभुजगराजाय। हिरण्यरेतसे। हिरण्यकवचोद्भवाय । हिरण्यबाहवे । हिरण्याय । हिरण्योद्भवकारणाय । हिरण्यकवचाय । हिरण्यदाय । हिरण्यश्मश्रवे । हिरण्यगर्भपुत्राणां प्राणसंरक्षणाय । हिरण्यकिंकीणीयुक्तकंकणाय । हिरण्यगर्भोत्तमांगच्छेदकाय । हिरण्यज्योतिर्विभ्रांतिसुप्रभाय । हिरण्यपतये । हिरण्यवाससे । हिरण्यरूपाय। हिरण्यनाभाय नमः। ९८८०

हिरण्यवर्णाय नमः । हिरण्यवीराय । हिरण्यदायिने । हिरण्यमालिने। हिरण्यवसुरेतसे। हिरण्यकुंडलाय। हिरण्मयाय। हिरण्मयपुरान्तस्थाय । हिरण्यदन्ताय । हिरण्यसंदृशे । हिरण्यसदृशप्रभाय । हेरम्बताताय । हल्लकांचत्किरीटाय । हलायुधाय । हालास्यमध्यनिलयाय । हालास्यनायकाय । हालास्यनाथाय । हालाहलालंकृतकंधराय । हालास्येशाय । हालास्यागतदेवदैत्यसंगतापदानाय नमः। ९९००

हालास्यप्रियाय नमः । हालाहलविषापहाय । हालाहलग्रासकरालकंठाय । हल्लेखामंत्रमध्यगाय । हविषे । हव्यवाहाय। हव्यवाहनाय। हविष्यभुजे। हवनाय। हविष्याशिने। हविर्हरये। हविष्मते। हव्यकव्याय। हव्यकव्यभुजे। हविर्धनाय। हविःप्रियाय । हंवामपादकटीतटाय । हंसाय । हंसवाहनाय हंसवाहनसंस्तुताय नमः। ९९२०

हंसगतये नमः । हंसाराध्याय । हंसाब्जसंभव-सुदूर सुमस्तकाय । हंसनाथाय । हंसमंडलमध्यस्थाय। हंसमंडलवासाय । हंसनेत्राय । हंसचक्ररथस्थाय । हंसचक्रनिवासाय । हस्ते वह्निधराय । हस्ताय ।

ह्रस्तराजत्पुंडरीकाय। ह्रस्वाय। हासमुखाब्जाय। हिंस्रभ्माशानि-कोन्मोह्नर्तनाय। हैहयेशाय। हाहाशब्दपरायणाय नमः। ९९३७

क्षकारस्य नृसिंहो देवता शत्रुजयार्थे विनियोगः

क्षांकारबीजनिलयाय नमः । क्षैंकारबीजनिलयाय । क्षणिकानां क्षणाकाराय नमः। ९९४०

क्षणाय नमः । क्षणानां पतये । क्षोणीपतिप्रीतिकराय । क्षत्तृभ्यो नमः । क्षतिक्षमाय । क्षान्ताय । क्षान्तिकराय । क्षान्तिनिलयाय । क्षान्त्यास्पदाय । क्षितौ पञ्चगुणप्रदाय । क्षितिपतिपतये। क्षितीशाय। क्षितिरूपाय। क्षेत्राय। क्षेत्रपतये। क्षेमकृते । क्षेत्रेशाय । क्षेत्रज्ञाय । क्षेत्रक्षेत्रज्ञाय । क्षेत्रपालकाय नमः। ९९६०

क्षेत्राणां पतये नमः । क्षेत्राधिपतये । क्षेत्राणामविमुक्तकाय। क्षुद्रघ्ने । क्षुधामराय । क्षुन्निवारकाय । क्षपणाय । क्षपणदक्षाय । क्षपापालाय । क्षपितपूर्वदैत्याय । क्षिप्रेषवे। क्षिप्रदग्धपुरत्रयाय। क्षिप्रक्षेमंकराय। क्षिप्रप्रसन्नाय। क्षिप्रप्रसादनाय। क्षुंबीजाय। क्ष्माभृते। क्षोभ्याय। क्षोभरहिताय। क्षोभनाशकाय नमः। ९९८०

क्षोभवर्जिताय नमः । क्षोभहारिणे । क्षमाय । क्षमापरपरायणाय। क्षमिणां वराय। क्षमाधनाय। क्षमाधाराय। क्षमालवे । क्षमापतये । क्षमाभर्त्रे । क्षमावते । क्षमाप्रियाय । क्षेमेश्वराय । क्षामाय । क्षामहराय । क्षामवते । क्षामोदराय । क्षामगात्राय। क्षमाकराय। क्षेमंकराय नमः। १००००

—*—*—